# Maitri (Maitrayani) Upanishad

# મૈત્રાયણ્યુપનિષત્

## Document Information

Text title : DeviMaitri(Maitrayani) Upanishad

File name : maitri.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 24/108; Sam Veda, yajurvedIya (?) Samanya Upanishad

Latest update : January 7, 2005, August 13, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2021

*sanskritdocuments.org*

# મૈત્રાયણ્યુપનિષત્

॥ અથ મૈત્રાયણ્યુપનિષત્ ॥

સામવેદીય સામાન્ય ઉપનિષત્ ॥

વૈરાગ્યોત્થભક્તિયુક્તબ્રહ્મમાત્રપ્રબોધતઃ ।
યત્પદં મુનયો યાન્તિ તત્ત્રૈપદમહં મહઃ ॥

ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોતમથો
બલમિન્દ્રિયાણિ ચ ।
સર્વાણિ સર્વં બ્રહ્મોપનિષદં માહં બ્રહ્મ નિરાકુર્યાં
મા મા બ્રહ્મ
નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેસ્તુ તદાત્મનિ નિરતે ય
ઉપનિષત્સુ
ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

મૈત્રાયણી કૌષિતકી બૃહજ્જાબાલતાપની ।
કાલાગ્નિરુદ્રમૈત્રેયી સુબાલક્ષુરમન્ત્રિકા ।
ૐ બૃહદ્રથો હ વૈ નામ રાજા રાજ્યે જ્યેષ્ઠં પુત્રં
નિધાપયિત્વેદમશાશ્વતં મન્યમાનઃ શારીરં
વૈરાગ્યમુપેતોઽરણ્યં નિર્જગામ સ તત્ર પરમં તપ
આસ્થાયાદિત્યમીક્ષમાણ ઊર્ધ્વબાહુસ્તિષ્ઠત્યન્તે સહસ્રસ્ય
મુનિરન્તિકમાજગામાગ્નિરિવાધૂમકસ્તેજસા
નિર્દહન્નિવાત્મવિદ્ભગવાઞ્છાકાયન્ય ઉત્તિષ્ઠોત્તિષ્ઠ વરં
વૃણીશ્વેતિ રાજાનમબ્રવીત્સ તસ્મૈ નમસ્કૃત્યોવાચ
ભગવન્નાહમાત્મવિત્ત્વં તત્ત્વવિચ્છૃણુમો વયં સ ત્વં નો
બ્રૂહીત્યેતદ્વૃતં પુરસ્તાદશક્યં મા પૃચ્છ
પ્રશ્નમૈક્ષ્વાકાન્યાન્કામાન્વૃણીશ્વેતિ શાકાયન્યસ્ય

ચરણવભિમૃશ્યમાનો રાજેમાં ગાથાં જગાદ ॥ ૧॥

ભગવન્નસ્થિચર્મસ્નાયુમજ્જામાંસશુક્રશોણિતશ્લેષ્માશ્રુદૂ
ષિતે વિણ્મૂત્રવાતપિત્તકફસઙ્ઘાતે દુર્ગન્ધે
નિઃસારેઽસ્મિઞ્છરીરે કિં કામોપભોગૈઃ ॥ ૨॥

કામક્રોધલોભભયવિષાદેર્ષ્યેષ્ટવિયોગાનિષ્ટસમ્પ્રયોગક્ષુ
ત્પિપાસાજરામૃત્યુરોગશોકાદ્યૈરભિહતેઽસ્મિઞ્છરીરે કિં
કામોપભોગૈઃ ॥ ૩॥

સર્વં ચેદં ક્ષયિષ્ણુ પશ્યામો યથેમે
દંશમશકાદયસ્તૃણવન્નશ્યતયોદ્ભૂતપ્રધ્વંસિનઃ ॥ ૪॥

અથ કિમેતૈર્વા પરેઽન્યે મહાધનુર્ધરાશ્ચક્રવર્તિનઃ
કેચિત્સુદ્યુમ્નભૂરિદ્યુમ્નેન્દ્રદ્યુમ્નકુવલયાશ્વયૌવનાશ્વવદ્ધ્રિયા
શ્વાશ્વપતિઃ શશબિન્દુર્હારિશ્ચન્દ્રોઽમ્બરીષો
નનૂક્તસ્વયાતિર્યયાતિનરણ્યોક્ષસેનોત્થમરુત્તભરતપ્રભૃતયો
રાજાનો મિષતો બન્ધુવર્ગસ્ય મહતીં શ્રિયં
ત્યક્ત્વાસ્માલ્લોકાદમું લોકં પ્રયાન્તિ ॥ ૫॥

અથ કિમેતૈર્વા પરેઽન્યે
ગન્ધર્વાસુરયક્ષરાક્ષસભૂતગણપિશાચોરગગ્રહાદીનાં
નિરોધનં પશ્યામઃ ॥ ૬॥

અથ કિમેતૈર્વાન્યાનાં શોષણં મહાર્ણવાનાં શિખરિણાં (કિમેતૈર્વાણ્ર્યાનાં)
પ્રપતનં ધ્રુવસ્ય પ્રચલનં (વ્રશ્ચનં વાતરજ્જૂનાં)
(સ્થાનં વા તરૂણાં)
નિમજ્જનં પૃથિવ્યાઃ સ્થાનાદપસરણં સુરાણં
સોઽહમિત્યેતદ્વિધેઽસ્મિન્સંસારે કિં
કામોપભોગૈર્યૈરેવાશ્રિતસ્યાસકૃદિહાવર્તનં દૃશ્યત
ઇત્યુદ્ધર્તુમર્હસીત્યન્ધોદપાનસ્થો ભેક ઇવાહમસ્મિન્સંસારે
ભગવંસ્ત્વં નો ગતિસ્ત્વં નો ગતિઃ ॥ ૭॥ ઇતિ પ્રથમઃ
પ્રપાઠકઃ ॥

---

અથ ભગવાઞ્છાકાયન્યઃ સુપ્રીતોઽબ્રવીદ્રાજાનં મહારાજ
બૃહદ્રથેક્ષ્વાકુવંશધ્વજશીર્ષાત્મજઃ કૃતકૃત્યસ્ત્વં

મરુન્નામ્નો વિશ્રુતોઽસીત્યયં વા વ ખલ્વાત્મા તે કતમો
ભગવાન્વર્ણ્ય ઇતિ તં હોવાચ ઇતિ ॥ ૧॥

ય એષો બાહ્યાવષ્ટમ્ભનેનોર્ધ્વમુત્ક્રાન્તો
વ્યથમાનોઽવ્યથમાનસ્તમઃ પ્રણુદત્યેષ આત્મેત્યાહ
ભગવાનથ ય એષ સમ્પ્રસાદોઽસ્માચ્છરીરાત્સમુત્થાય
પરં જ્યોતિરુપસમ્પદ્ય સ્વેન રૂપેણાભિનિષ્પદ્યત એષ આત્મેતિ
હોવાચૈતદમૃતમભયમેતદ્બ્રહ્મેતિ ॥ ૨॥

અથ ખલ્વિયં બ્રહ્મવિદ્યા સર્વોપનિષદ્વિદ્યા વા રાજન્નસ્માકં
ભગવતા મૈત્રેયેણ વ્યાખ્યાતાહં તે
કથયિષ્યામીત્યથાપહતપાપ્માનસ્તિગ્મતેજસ ઊર્ધ્વરેતસો
વાલખિલ્યા ઇતિ શ્રૂયન્તેઽથૈતે
પ્રજાપતિમબ્રુવન્ભગવઞ્શકટમિવાચેતનમિદં શરીરં
કસ્યૈષ ખલ્વીદૃશો મહિમાતીન્દ્રિયભૂતસ્ય
યેનૈતદ્વિધમિદં ચેતનવત્પ્રતિષ્ઠાપિતં પ્રચોદયિતાસ્ય કો
ભગવન્નેતદસ્માકં બ્રૂહીતિ તાન્હોવાચ ॥ ૩॥

યો હ ખલુ વાચોપરિસ્થઃ શ્રૂયતે સ એવ વા એષ શુદ્ધઃ
પૂતઃ શૂન્યઃ શાન્તો પ્રાણોઽનીશાત્માઽનન્તોઽક્ષય્યઃ સ્થિરઃ
શાશ્વતોઽજઃ સ્વતન્ત્રઃ સ્વે મહિમ્નિ તિષ્ઠત્યનેનેદં શરીરં
ચેતનવત્પ્રતિષ્ઠાપિતં પ્રચોદયિતા ચૈષોઽસ્યેતિ તે
હોચુર્ભગવન્કથમનેનેદૃશેનાનિચ્છેનૈતદ્વિધમિદં
ચેતનવત્પ્રતિષ્ઠાપિતં પ્રચોદયિતા ચૈષોઽસ્યેતિ કથમિતિ
તાન્હોવાચ ॥ ૪॥

સ વા એષ સૂક્ષ્મોઽગ્રાહ્યોઽદૃશ્યઃ પુરુષસંજ્ઞકો
બુદ્ધિપૂર્વમિહૈવાવર્તતેંઽશેન સુષુપ્તસ્યૈવ બુદ્ધિપૂર્વં
નિબોધયત્યથ યોહ ખલુ વાવાઇતસ્યાંશોઽયં
યશ્ચેતનમાત્રઃ પ્રતિપૂરુષં ક્ષેત્રજ્ઞઃ
સઙ્કલ્પાધ્યવસાયાભિમાનલિઙ્ગઃ પ્રજાપતિર્વિશ્વક્ષસ્તેન
ચેતનેનેદં શરીરં ચેતનવત્પ્રતિષ્ઠાપિતં પ્રચોદયિતા
ચૈષોઽસ્યેતિ તે હોચુર્ભગવન્નીદૃશસ્ય કથમંશેન
વર્તનમિતિ તાન્હોવાચ ॥ ૫॥

પ્રજાપતિર્વા એષોઽગ્રેઽતિષ્ઠત્સ નારમતૈકઃ સ
આત્મનમભિધ્યાયદ્બહ્વીઃ પ્રજા અસૃજત્ત અસ્યૈવાત્મપ્રબુદ્ધા
અપ્રાણા સ્થાણુરિવ તિષ્ઠમાના અપશ્યત્સ નારમત
સોઽમન્યતૈતાસં પ્રતિબોધનાયાભ્યન્તરં પ્રાવિશાનીત્યથ સ
વાયુમિવાત્માનં કૃત્વાભ્યન્તરં પ્રાવિશત્સ એકો નાવિશત્સ
પઞ્ચધાત્માનં પ્રવિભજ્યોચ્યતે યઃ પ્રાણોઽપાનઃ સમાન
ઉદાનો વ્યાન ઇતિ ॥ ૬॥

અથ યોઽયમૂર્ધ્વમુત્ક્રામતીત્યેષ વાવ સ પ્રાણોઽથ
યોયમાવઞ્ચં સંક્રામત્વેષ વાવ સોઽપાનોઽથ યોયં
સ્થવિષ્ઠમન્નધાતુમપાને સ્થાપયત્યણિષ્ઠં ચાઙ્ગેઽઙ્ગે
સમં નયત્યેષ વાવ સ સમાનોઽથ યોઽયં પીતાશિતમુદ્ગિરતિ
નિગિરતીતિ ચૈષ વાવ સ ઉદાનોઽથ યેનૈતાઃ શિરા
અનુવ્યાપ્તા એષ વાવ સ વ્યાનઃ ॥ ૭॥

અથોપાંશુરન્તર્યામ્યભિભવત્યન્તર્યામમુપાંશુમેતયોરન્તરાલે
ચૌષ્ણ્યં માસવદૌષ્ણ્યં સ પુરુષોઽથ યઃ પુરુષઃ
સોઽગ્નિર્વૈશ્વાનરોઽપ્યન્યત્રાપ્યુક્તમયમગ્નિર્વૈશ્વાનરો
યોઽયમનન્તઃ પુરુષો યેનેદમન્નં પચ્યતે યદિદમદ્યતે
તસ્યૈષ ઘોષો ભવતિ યદેતત્કર્ણાવપિધાય શ◌ૃણોતિ સ
યદોત્ક્રમિષ્યન્ભવતિ નૈનં ઘોષં શ◌ૃણોતિ ॥ ૮॥

સ વા એષ પઞ્ચધાત્માનં પ્રવિભજ્ય નિહિતો ગુહાયાં
મનોમયઃ પ્રાણશરીરો બહુરૂપઃ સત્યસં કલ્પ આત્મેતિ સ વા
એષોઽસ્ય હૃદન્તરે તિષ્ઠન્નકૃતાર્થોઽમન્યતાર્થાનસાનિ
તત્સ્વાનીમાનિ ભિત્ત્વોદિતઃ પઞ્ચભી રશ્મિભિર્વિષયાનત્તીતિ
બુદ્ધીન્દ્રિયાણિ યાનીમાન્યેતાન્યસ્ય રશ્મયઃ કર્મેન્દ્રિયાણ્યસ્ય
હયા રથઃ શરીરં મનો નિયન્તા પ્રકૃતિમયોસ્ય પ્રતોદનેન
ખલ્વીરિતં પરિભ્રમતીદં શરીરં ચક્રમિવ મૃતે ચ
નેદં શરીરં ચેતનવત્પ્રતિષ્ઠાપિતં પ્રચોદયિતા
ચૈષોઽસ્યેતિ ॥ ૯॥

સ વા એષ આત્મેત્યદો વશં નીત ઇવ સિતાસિતૈઃ
કર્મફલૈરભિભૂયમાન ઇવ પ્રતિશરીરેષુ

ચરત્યવ્યક્તત્વાત્સૂક્ષ્મત્વાદદૃશ્યત્વાદગ્રાહ્યત્વાન્નિર્મમત્વા
ચ્ચાનવસ્થોઽકર્તા કર્તેવાવસ્થિતઃ ॥ ૧૦॥

સ વા એષ શુદ્ધઃ સ્થિરોઽચલશ્ચાલેપોઽવ્યગ્રો નિઃસ્પૃહઃ
પ્રેક્ષકવદવસ્થિતઃ સ્વસ્ય ચરિતભુગ્ગુણમયેન
પટેનાત્માનમન્તર્ધીયાવસ્થિત ઇત્યવસ્થિત ઇતિ ॥ ૧૧॥ ઇતિ
દ્વિતીયઃ પ્રપાઠકઃ ॥

---

તે હોચુર્ભગવન્યદ્યેવમસ્યાત્મનો મહિમાનં સૂચયસીત્યન્યો
વા પરઃ કોઽયમાત્મા સિતાસિતૈઃ કર્મફલૈરભિભૂયમાનઃ
સદસદ્યોનિમાપદ્યત ઇત્યવાચીં વોર્ધ્વાં વા ગતં
દ્વન્દ્વૈરભિભૂયમાનઃ પરિભ્રમતીતિ કતમ એષ ઇતિ
તાન્હોવાચ ॥ ૧॥

અસ્તિ ખલ્વન્યોઽપરો ભૂતાત્મા યોઽયં સિતાસિતૈઃ
કર્મફલૈરભિભૂયમાનઃ સદસદ્યોનિમાપદ્યત ઇત્યવાચીં
વોર્ધ્વાં ગતિં દ્વન્દ્વૈરભિભૂયમાનઃ
પરિભ્રમતીત્યસ્યોપવ્યાખ્યાનં પઞ્ચ તન્માત્રાણિ
ભૂતશબ્દેનોચ્યન્તે પઞ્ચ મહાભૂતાનિ
ભૂતશબ્દેનોચ્યન્તેઽથ તેષાં યઃ સમુદાયઃ
શરીરમિત્યુક્તમથ યો હ ખલુ વાવ શરીરમિત્યુક્તં સ
ભૂતાત્મેત્યુક્તમથાસ્તિ તસ્યાત્મા બિન્દુરિવ પુષ્કર ઇતિ સ વા
એષોઽભિભૂતઃ
પ્રાકૃત્યૈર્ગુણૈરિત્યતોઽભિભૂતત્વાત્સંમૂઢત્વં
પ્રયાત્યસંમૂઢસ્ત્વાદાત્મસ્થં પ્રભું ભગવન્તં
કારયિતારં નાપશ્યદ્ગુણૌઘૈસ્તૃપ્યમાનઃ
કલુષીકૃતાસ્થિરશ્ચઞ્ચલો લોલુપ્યમાનઃ સસ્પૃહો
વ્યગ્રશ્ચાભિમાનત્વં પ્રયાત ઇત્યહં સો મમેદમિત્યેવં
મન્યમાનો નિબધ્નાત્યાત્મનાત્માનં જાલેનૈવ ખચરઃ
કૃતસ્યાનુફલૈરભિભૂયમાનઃ પરિભ્રમતીતિ ॥ ૨॥

અથાન્યત્રાપ્યુક્તં યઃ કર્તા સોઽયં વૈ ભૂતાત્મા કરણૈઃ
કારયિતાન્તઃપુરુષોઽથ યથાગ્નિનાયઃપિણ્ડો વાભિભૂતઃ

કર્તૃભિર્હન્યમાનો નાનાત્વમુપૈત્યેવં વાવ ખલ્વસૌ
ભૂતાત્માન્તઃપુરુષેણાભિભૂતો ગુણૈર્હન્યમાનો
નાનાત્વમુપૈત્યથ યત્રિગુણં ચતુરશીતિલક્ષયોનિપરિણતં
ભૂતત્રિગુણમેતદ્વૈ નાનાત્વસ્ય રૂપં તાનિ હ વા ઇમાનિ
ગુણાનિ પુરુષેણેરિતાનિ ચક્રમિવ ચક્રિણેત્યથ યથાયઃપિણ્ડે
હન્યમાને નાગ્નિરભિભૂયત્યેવં નાભિભૂયત્યસૌ
પુરુષોઽભિભૂયત્યયં ભૂતાત્મોપસંશ્લિષ્ટત્વાદિતિ ॥ ૩॥

અથાન્યત્રાપ્યુક્તં શરીરમિદં મૈથુનાદેવોદ્ભૂતં
સંવિદપેતં નિરય એવ મૂત્રદ્વારેણ
નિષ્ક્રામન્તમસ્થિભિશ્ચિતં માંસેનાનુલિપ્તં
ચર્મણાવબદ્ધં વિણ્મૂત્રપિત્તકફમજ્જામેદોવસાભિરન્યૈશ્ચ
મલૈર્બહુભિઃ પરિપૂર્ણં કોશ ઇવાવસન્નેતિ ॥ ૪॥

અથાન્યત્રાપ્યુક્તં સંમોહો ભયં વિષાદો નિદ્રા તન્દ્રી વ્રણો
જરા શોકઃ ક્ષુત્પિપાસા કાર્પણ્યં ક્રોધો નાસ્તિક્યમજ્ઞાનં
માત્સર્યં વૈકારુણ્યં મૂઢત્વં નિર્વ્રીડત્વં
નિકૃતત્વમુદ્ધાતત્વમસમત્વમિતિ તામસાન્વિતસ્તૃષ્ણા સ્નેહો
રાગો લોભો હિંસા રતિર્દૃષ્ટિવ્યાપૃતત્વમીર્ષ્યા
કામમવસ્થિતત્વં ચઞ્ચલત્વં જિહીર્ષાર્થોપાર્જનં
મિત્રાનુગ્રહણં પરિગ્રહાવલમ્બોઽનિષ્ટેષ્વિન્દ્રિયાર્થેષુ
દ્વિષ્ટિરિષ્ટેશ્વભિષઙ્ગ ઇતિ રાજસાન્વિતૈઃ પરિપૂર્ણ
એતૈરભિભૂત ઇત્યયં ભૂતાત્મા
તસ્માન્નાનારૂપાણ્યાપ્નોતીત્યાપ્નોતીતિ ॥ ૫॥ તૃતીયઃ
પ્રપાઠકઃ ॥

---

તે હ ખલ્વથોર્ધ્વરેતસોઽતિવિસ્મિતા અતિસમેત્યોચુર્ભગવન્નમસ્તે
ત્વં નઃ શાધિ ત્વમસ્માકં ગતિરન્યા ન વિદ્યત ઇત્યસ્ય
કોઽતિથિર્ભૂતાત્મનો યેનેદં હિત્વામન્યેવ સાયુજ્યમુપૈતિ
તાન્હોવાચ ॥ ૧॥

અથાન્યત્રાપ્યુક્તં મહાનદીષૂર્મય ઇવ નિવર્તકમસ્ય
યત્પુરાકૃતં સમુદ્રવેલેવ દુર્નિવાર્યમસ્ય મૃત્યોરાગમનં

સદસત્ફલમયૈર્હિ પાશૈઃ પશુરિવ બદ્ધં
બન્ધનસ્થસ્યેવાસ્વાતન્ત્ર્યં યમવિષયસ્થસ્યૈવ
બહુભયાવસ્થં મદિરોન્મત્ત ઇવામોદમમદિરોન્મત્તં પાપ્મના
ગૃહીત ઇવ ભ્રામ્યમાણં મહોરગદષ્ટ ઇવ વિપદૃષ્ટં
મહાન્ધકાર ઇવ રાગાન્ધમિન્દ્રજાલમિવ માયામયં સ્વપ્નમિવ
મિથ્યાદર્શનં કદલીગર્ભ ઇવાસારં નટ ઇવ ક્ષણવેષં
ચિત્રભિત્તિરિવ મિથ્યામનોરમમિત્યથોક્તમ્ ॥ શબ્દસ્પર્શાદયો
યેઽર્થા અનર્થા ઇવ તે સ્થિતાઃ । યેષ્વાસક્તસ્તુ ભૂતાત્મા ન
સ્મરેચ્ચ પરં પદમ્ ॥ ૨॥

અયં વા વ ખલ્વસ્ય પ્રતિવિધિર્ભૂતાત્મનો યથૈવ
વિદ્યાધિગમસ્ય ધર્મસ્યાનુચરણં સ્વાશ્રમેષ્વાનુક્રમણં
સ્વધર્મ એવ સર્વં ધત્તે
સ્તમ્ભશાખેવેતરાણ્યનેનોર્ધ્વભાગ્ભવત્યન્યથધઃ પતત્યેષ
સ્વધર્માભિભૂતો યો વેદેષુ ન સ્વધર્માતિક્રમેણાશ્રમી
ભવત્યાશ્રમેષ્વેવાવસ્થિતસ્તપસ્વી ચેત્યુચ્યત એતદપ્યુક્તં
નાતપસ્કસ્યાત્મધ્યાનેઽધિગમઃ કર્મશુદ્ધિર્વેત્યેવં હ્યાહ ॥

તપસા પ્રાપ્યતે સત્ત્વં સત્ત્વાત્સમ્પ્રાપ્યતે મનઃ ।
મનસા પ્રાપ્યતે ત્વાત્મા હ્યાત્માપત્ત્યા નિવર્તત ઇતિ ॥ ૩॥

અત્રૈતે શ્લોકા ભવન્તિ ॥

યથા નિરિન્ધનો વહ્નિઃ સ્વયોનાવુપશામ્યતિ ।
તથા વૃત્તિક્ષયાચ્ચિત્તં સ્વયોનાવુપશામ્યતિ ॥ ૧॥

સ્વયોનાવુપશાન્તસ્ય મનસઃ સત્યગામિનઃ ।
ઇન્દ્રિયાર્થાવિમૂઢસ્યાનૃતાઃ કર્મવશાનુગાઃ ॥ ૨॥

ચિત્તમેવ હિ સંસારસ્તત્પ્રયત્નેન શોધયેત્ ।
યચ્ચિત્તસ્તન્મયો ભવતિ ગુહ્યમેતત્સનાતનમ્ ॥ ૩॥

ચિત્તસ્ય હિ પ્રસાદેન હન્તિ કર્મ શુભાશુભમ્ ।
પ્રસન્નાત્માત્મનિ સ્થિત્વા સુખમવ્યયમશ્નુતે॥ ૪॥

સમાસક્તં યદા ચિત્તં જન્તોર્વિષયગોચરે ।
યદ્યેવં બ્રહ્મણિ સ્યાત્તત્કો ન મુચ્યેત બન્ધનાત્ ॥ ૫॥

મનો હિ દ્વિવિધં પ્રોક્તં શુદ્ધં ચાશુદ્ધમેવ ચ ।
અશુદ્ધં કામસઙ્કલ્પં શુદ્ધં કામવિવર્જિતમ્ ॥ ૬॥

લયવિક્ષેપરહિતં મનઃ કૃત્વા સુનિશ્ચલમ્ ।
યદા યાત્યમનીભાવં તદા તત્પરમં પદમ્ ॥ ૭॥

તાવદેવ નિરોદ્ધવ્યં હૃદિ યાવત્ક્ષયં ગતમ્ ।
એતજ્જ્ઞાનં ચ મોક્ષં ચ શેષાસ્તુ ગ્રન્થવિસ્તરાઃ ॥ ૮॥

સમાધિનિર્ધૂતમલસ્ય ચેતસો
 નિવેશિતસ્યાત્મનિ યત્સુખં લભેત્ ।
ન શક્યતે વર્ણયિતું ગિરા તદા
 સ્વયં તદન્તઃકરણેન ગૃહ્યતે ॥ ૯॥

અપામપોઽગ્નિરગ્નૌ વા વ્યોમ્નિ વ્યોમ ન લક્ષયેત્ ।
એવમન્તર્ગતં ચિત્તં પુરુષઃ પ્રતિમુચ્યતે ॥ ૧૦॥

મન એવ મનુષ્યાણાં કારણં બન્ધમોક્ષયોઃ ।
બન્ધાય વિષયાસક્તં મુક્ત્યૈ નિર્વિષયં સ્મૃતમિતિ ॥ ૧૧॥

અથ યથેયં કૌત્સાયનિસ્તુતિઃ ॥

ત્વં બ્રહ્મા ત્વં ચ વૈ વિષ્ણુસ્ત્વં રુદ્રસ્ત્વં પ્રજાપતિઃ ।
ત્વમગ્નિર્વરુણો વાયુસ્ત્વમિન્દ્રસ્ત્વં નિશાકરઃ ॥ ૧૨॥

ત્વં મનુસ્ત્વં યમશ્ચ ત્વં પૃથિવી ત્વમથાચ્યુતઃ ।
સ્વાર્થે સ્વાભાવિકેઽર્થે ચ બહુધા તિષ્ઠસે દિવિ ॥ ૧૩॥

વિશ્વેશ્વર નમસ્તુભ્યં વિશ્વાત્મા વિશ્વકર્મકૃત્ ।
વિશ્વભુગ્વિશ્વમાયસ્ત્વં વિશ્વક્રીડારતિઃ પ્રભુઃ ॥ ૧૪॥

નમઃ શાન્તાત્મને તુભ્યં નમો ગુહ્યતમાય ચ ।
અચિન્ત્યાયાપ્રમેયાય અનાદિનિધનાય ચેતિ ॥ ૧૫॥ ॥ ૪॥

તમો વા ઇદમેકમાસ તત્પશ્ચાત્પરેણેરિતં વિષયત્વં
પ્રયાત્યેતદ્વૈ રજસો રૂપં તદ્રજઃ ખલ્વીરિતં વિષમત્વં
પ્રયાત્યેતદ્વૈ તમસો રૂપં તત્તમઃ ખલ્વીરિતં તમસઃ
સમ્પ્રાસ્રવત્યેતદ્વૈ સત્ત્વસ્ય રૂપં તત્સત્ત્વમેવેરિતં
તત્સત્ત્વાત્સમ્પ્રાસ્રવત્સોંઽશોઽયં યશ્ચેતનમાત્રઃ

પ્રતિપુરુષં ક્ષેત્રજ્ઞઃ સઙ્કલ્પાધ્યવસાયાભિમાનલિઙ્ગઃ
પ્રજાપતિસ્તસ્ય પ્રોક્તા અગ્ર્યાસ્તનવો બ્રહ્મા રુદ્રો વિષ્ણુરિત્યથ
યો હ ખલુ વાવાસ્ય રાજસોંऽશોऽસૌ સ યોऽયં બ્રહ્માથ યો હ
ખલુ વાવાસ્ય તામસોંऽશોऽસૌ સ યોऽયં રુદ્રોऽથ યો હ
ખલુ વાવાસ્ય સાત્વિકોંऽશોऽસૌ સ એવં વિષ્ણુઃ સ વા એષ
એકસ્ત્રિધાભૂતોऽષ્ટધૈકાદશધા દ્વાદશધાપરિમિતધા
ચોદ્ભૂત ઉદ્ભૂતત્વાદ્ભૂતેષુ ચરતિ પ્રતિષ્ઠા
સર્વભૂતાનામધિપતિર્બભૂવેત્યસાવાત્માન્તર્બહિશ્ચાન્તર્બહિસ્
હ્ચ ॥ ૫॥ ચતુર્થઃ પ્રપાઠકઃ ॥

---

દ્વિધા વા એષ આત્માનં બિભર્ત્યયં યઃ પ્રાણો
યશ્ચાસાવાદિત્યોऽથ દ્વૌ વા એતાવાસ્તાં પઞ્ચધા
નામાન્તર્બહિશ્ચાહોરાત્રે તૌ વ્યાવર્તેતે અસૌ વા આદિત્યો
બહિરાત્માન્તરાત્મા પ્રાણો બહિરાત્મા ગત્યાન્તરાત્મનાનુમીયતે
। ગતિરિત્યેવં હ્યાહ યઃ
કશ્ચિદ્વિદ્વાનપહતપાપ્માધ્યક્ષોऽવદાતમનાસ્તન્નિષ્ઠ
આવૃત્તચક્ષુઃ સોऽન્તરાત્માગત્યા બહિરાત્મનોऽનુમીયતે
ગતિરિત્યેવં હ્યાહાથ ય એષોऽન્તરાદિત્યે હિરણ્મયઃ પુરુષો
યઃ પશ્યતિ માં હિરણ્યવત્સ એષોऽન્તરે હૃત્પુષ્કર
એવાશ્રિતોऽન્નમત્તિ ॥ ૧॥

અથ ય એષોऽન્તરે હૃત્પુષ્કર એવાશ્રિતોऽન્નમત્તિ સ
એષોऽગ્નિર્દિવિ શ્રિતઃ સૌરઃ કાલાખ્યોऽદૃશ્યઃ
સર્વભૂતાન્નમત્તિ કઃ પુષ્કરઃ કિમયં વેદ વા વ
તત્પુષ્કરં યોऽયમાકાશોऽસ્યેમાશ્ચતસ્રો દિશશ્ચતસ્ર
ઉપદિશઃ સંસ્થા અયમર્વાગગ્નિઃ પરત એતૌ
પ્રાણાદિત્યાવેતાવુપાસીતોમિત્યક્ષરેણ વ્યાહૃતિભિઃ સાવિત્ર્યા
ચેતિ ॥ ૨॥

દ્વે વાવ બ્રહ્મણો રૂપે મૂર્તં ચામૂર્તં ચાથ યન્મૂર્તં
તદસત્યં યદમૂર્તં તત્સત્યં તદ્બ્રહ્મ યદ્બ્રહ્મ
તજ્જ્યોતિર્યજ્જ્યોતિઃ સ આદિત્યઃ સ વા એષ ઓમિત્યેતદાત્મા સ
ત્રેધાત્માનં વ્યકુરુત ઓમિતિ તિસ્રો માત્રા એતાભિઃ સર્વમિદમોતં

પ્રોતં ચૈવાસ્મિન્નિત્યેવં હ્યાહૈતદ્વા આદિત્ય ઓમિત્યેવં
ધ્યાયંસ્તથાત્માનં યુઞ્જીતેતિ ॥ ૩॥

અથાન્યત્રાપ્યુક્તમથ ખલુ ય ઉદ્ગીથઃ સ પ્રણવો યઃ પ્રણવઃ
સ ઉદ્ગીથ ઇત્યસાવાદિત્ય ઉદ્ગીથ એવ પ્રણવ ઇત્યેવં
હ્યાહોદ્ગીથઃ પ્રણવાખ્યં પ્રણેતારં નામરૂપં વિગતનિદ્રં
વિજરમવિમૃત્યું પુનઃ પઞ્ચધા જ્ઞેયં નિહિતં
ગુહાયામિત્યેવં હ્યાહોર્ધ્વમૂલં વા આબ્રહ્મશાખા
આકાશવાય્વગ્ન્યુદકભૂમ્યાદય એકેનાત્તમેતદ્બ્રહ્મ
તત્તસ્યૈતત્તે યદસાવાદિત્ય ઓમિત્યેતદક્ષરસ્ય
ચૈતત્તસ્માદોમિત્યનેનૈતદુપાસીતાજસ્રમિત્યેકોऽસ્ય રસં
બોધયીત ઇત્યેવં હ્યાહૈતદેવાક્ષરં પુણ્યમેતદેવાક્ષરં
જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ॥ ૪॥

અથાન્યત્રાપ્યુક્તં સ્તનયત્યેપાસ્ય તનૂર્યા ઓમિતિ
સ્ત્રીપુંનપુંસકમિતિ લિઙ્ગવત્યેષાથાગ્નિર્વાયુરાદિત્ય ઇતિ
ભાસ્વત્યેષાથ રુદ્રો વિષ્ણુરિત્યધિપતિરિત્યેષાથ ગાર્હપત્યો
દક્ષણાગ્નિરાહવનીય ઇતિ મુખવત્યેષાથ ઋગ્યજુઃસામેતિ
વિજાનાત્યેષથ ભૂર્ભુવસ્વરિતિ લોકવત્યેષાથ ભૂતં
ભવ્યં ભવિષ્યદિતિ કાલવત્યેષાથ પ્રાણોऽગ્નિઃ સૂર્યઃ ઇતિ
પ્રતાપવત્યેષાથાન્નમાપશ્ચન્દ્રમા ઇત્યાપ્યાયનવત્યેષાથ
બુદ્ધિર્મનોऽહઙ્કાર ઇતિ ચેતનવત્યેષાથ પ્રાણોऽપાનો વ્યાન
ઇતિ પ્રાણવત્યેકે ત્યજામીત્યુક્તૈતાહ પ્રસ્તોતાર્પિતા
ભવતીત્યેવં હ્યાહૈતદ્વૈ સત્યકામ પરં ચાપરં ચ
યદોમિત્યેતદક્ષરમિતિ ॥ ૫॥

અથ વ્યાત્તં વા ઇદમાસીત્સત્યં પ્રજાપતિસ્તપસ્તપ્ત્વા
અનુવ્યાહરદ્ભૂર્ભુવઃસ્વરિત્યેષા હાથ પ્રજાપતેઃ સ્થવિષ્ઠા
તનૂર્વા લોકવતીતિ સ્વરિત્યસ્યાઃ શિરો નાભિર્ભુવો ભૂઃ પાદા
આદિત્યશ્ચક્ષુરાયત્તઃ પુરુષસ્ય મહતો માત્રાશ્ચક્ષુષા
હ્યયં માત્રાશ્ચરિતિ સત્યં વૈ ચક્ષુરક્ષિણ્યુપસ્થિતો હિ
પુરુષઃ સર્વાર્થેષુ
વદત્યેતસ્માદ્ભૂર્ભુવઃસ્વરિત્યુપાસીતાન્નં હિ
પ્રજાપતિર્વિશ્વાત્મા વિશ્વચક્ષુરિવોપાસિતો ભવતીત્યેવં

હ્યાહૈષા વૈ પ્રજાપતિર્વિશ્વભૃત્તનૂરેતસ્યામિદં
સર્વમન્તર્હિતમસ્મિઁશ્ચ સર્વસ્મિન્નેષાન્તર્હિતેતિ
તસ્માદેષોપાસીતેતિ ॥ ૬॥

તત્સવિતુર્વરેણ્યમિત્યસૌ વા આદિત્યઃ સવિતા સ વા એવં
પ્રવરણાય આત્મકામેનેત્યાહુર્બ્રહ્મવાદિનોઽથ ભર્ગો દેવસ્ય
ધીમહીતિ સવિતા વૈ તેઽવસ્થિતા યોઽસ્ય ભર્ગઃ કં
સઞ્ચિતયામીત્યાહુર્બ્રહ્મવાદિનોઽથ ધિયો યો નઃ પ્રચોદયાદિતિ
બુદ્ધયો વૈ ધિયસ્તા યોઽસ્માકં
પ્રચોદયાદિત્યાહુર્બ્રહ્મવાદિનોઽથ ભર્ગ ઇતિ યો હ વા
અસ્મિન્નાદિત્યે નિહિતસ્તારકેઽક્ષિણિ ચૈષ ભર્ગાખ્યો
ભાભિર્ગતિરસ્ય હીતિ ભર્ગો ભર્જતિ વૈષ ભર્ગ ઇતિ
બ્રહ્મવાદિનોઽથ ભર્ગ ઇતિ ભાસયતીમાઁલ્લોકાનિતિ
રઞ્જયતીમાનિ ભૂતાનિ ગચ્છત ઇતિ
ગચ્છત્યસ્મિન્નાગચ્છત્યસ્મા ઇમાઃ
પ્રજાસ્તસ્માદ્ભારકત્વાદ્ભર્ગઃ શત્રૂન્સૂયમાનત્વાત્સૂર્યઃ
સવ્નાત્સવિતા દાનાદાદિત્યઃ
પવનાત્પાવમાનોઽથાયોઽથાયનાદાદિત્ય ઇત્યેવં હ્યાહ
ખલ્વાત્મનાત્મામૃતાખ્યશ્ચેતા મન્તા ગન્તા સ્રષ્ટા
નન્દયિતા કર્તા વક્તા રસયિતા ઘ્રાતા સ્પર્શયિતા ચ
વિભુર્વિગ્રહે સન્નિષ્ટા ઇત્યેવં હ્યાહાથ યત્ર દ્વૈતીભૂતં
વિજ્ઞાનં તત્ર હિ શ◌ૃણોતિ પશ્યતિ જિઘ્રતીતિ રસયતે ચૈવ
સ્પર્શયતિ સર્વમાત્મા જાનીતેતિ યત્રાદ્વૈતીભૂતં વિજ્ઞાનં
કાર્યકારણનિર્મુક્તં નિર્વચનમનૌપમ્યં નિરુપાખ્યં કિં
તદઙ્ગ વાચ્યમ્ ॥ ૭॥

એષ હિ ખલ્વાત્મેશાનઃ શંભુર્ભવો રુદ્રઃ
પ્રજાપતિર્વિશ્વસૃડ્ઢિરણ્યગર્ભઃ સત્યં પ્રાણો હંસઃ શાન્તો
વિષ્ણુર્નારાયણોઽર્કઃ સવિતા ધાતા સમ્રાડિન્દ્ર ઇન્દુરિતિ ય
એષ તપત્યગ્નિના પિહિતઃ સહસ્રાક્ષેણ હિરણ્મયેનાનન્દેનૈષ
વાવ વિજિજ્ઞાસિતવ્યોઽન્વેષ્ટવ્યઃ સર્વભૂતેભ્યોઽભયં
દત્ત્વારણ્યં ગત્વાથ
બહિઃકૃતેન્દ્રિયાર્થાન્સ્વશરીરાદુપલભતેઽથૈનમિતિ

વિશ્વરૂપં હરિણં જાતવેદસં પરાયણં જ્યોતિરેકં
તપન્તમ્ । સહસ્રરશ્મિઃ શતધા વર્તમાનઃ પ્રાણઃ
પ્રજાનામુદયત્યેષ સૂર્યઃ ॥ ૮॥ ઇતિ પઞ્ચમઃ પ્રપાઠકઃ ॥

---

। અથ પ્રપાઠક ૬ ।
દ્વિધા વા એષ આત્માનં બિભર્ત્યયં યઃ પ્રાણો
યશ્ચાસા આદિત્યોऽથ દ્વૌ વા એતા અસ્ય પન્થાના
અન્તર્બહિશ્ચાહોરાત્રેણૈતૌ વ્યાવર્તેતે  અસૌ વા આદિત્યો
બહિરાત્માન્તરાત્મા પ્રાણોऽતો બહિરાત્મક્યા
ગત્યાન્તરાત્મનોऽનુમીયતે ગતિરિત્યેવં હિ આહાથ યઃ
કશ્ચિદ્વિદ્વાનપહતપાપ્માऽક્ષાધ્યક્ષોऽવદાતમનાસ્તન્નિષ્ઠ
આવૃત્તચક્ષુઃ સો અન્તરાત્મક્યા ગત્યા બહિરાત્મનોऽનુમીયતે
ગતિરિત્યેવં હ આહ  અથ ય એષોऽન્તરાદિત્યે હિરણ્મયઃ પુરુષો યઃ
પશ્યતીમાં હિરણ્યવસ્થાત્ સ એષોऽન્તરે હૃત્પુષ્કર
એવાશ્રિતોऽન્નમત્તિ ॥ ૧॥

અથ ય એષોऽન્તરે હૃત્પુષ્કર એવાશ્રિતોऽન્નમત્તિ સ એષોऽગ્નિર્દિવિ
શ્રિતઃ સૌરઃ કાલાખ્યોऽદૃશ્યઃ સર્વભૂતાન્યન્નમત્તીતિ  કઃ
પુષ્કરઃ
કિંમયો વેતિ  ઇઅદં વા વ તત્પુષ્કરં યોऽયમાકાશોऽસ્યેમાઃ
ચતસ્રો દિશશ્ચતસ્ર ઉપદિશો દલસંસ્થા આસમર્વાગ્વિચરત એતૌ
પ્રાણાદિત્યા એતા ઉપાસિતોમિત્યેતદક્ષરેણ વ્યાહૃતિભિઃ
સાવિત્ર્યા ચેતિ ॥ ૨॥

દ્વે વાવ બ્રહ્મણો રૂપે મૂર્તં ચામૂર્તં ચ । અથ યન્મૂર્તં
તદસત્યમ્  યદમૂર્તં તત્સત્યમ્ તદ્બ્રહ્મ તજ્જ્યોતિઃ યજ્જ્યોતિઃ સ
આદિત્યઃ સ વા એષ ઓમિત્યેતદાત્માભવત્  સ ત્રેધાત્માનં વ્યાકુરુત
ઓમિતિ  તિસ્રો માત્રા  એતાભિઃ સર્વમિદમોતં પ્રોતં ચૈવાસ્મીતિ  એવં
હ્યાહૈતદ્વા આદિત્ય ઓમિત્યેવં ધ્યાયત આત્માનં યુઞ્જીતેતિ ॥ ૩॥

અથાન્યત્રાપિ ઉક્તમથ ખલુ ય ઉદ્ગીથઃ સ પ્રણવો યઃ પ્રણવઃ
સ ઉદ્ગીથ ઇતિ  અસૌ વા આદિત્ય ઉદ્ગીથ એષ પ્રણવા ઇતિ । એવં
હ્યાહોદ્ગીથં પ્રણવાખ્યં પ્રણેતારં ભારૂપં

વિગતનિદ્રં વિજરં વિમૃત્યું
ત્રિપદં ત્ર્યક્ષરં પુનઃ પઞ્ચધા જ્ઞેયં નિહિતં ગુહાયામિત્યેવં
હ્યાહોર્ધ્વમૂલં ત્રિપાદ્બ્રહ્મ શાખા આકાશ વાય્વગ્ન્યુદકભૂમ્યાદય
એકોઽશ્વત્થનામૈતદ્બ્રહ્મૈતસ્યૈતત્તેજો યદસા આદિત્યઃ ઓમિત્યેતદક્ષરસ્ય
ચૈતત્તસ્માદોમિત્યનેનૈતદુપાસીતાજસ્રમિત્યેકોઽસ્ય સમ્બોધયિતેત્યેવં
હ્યાહ :
એતદેવાક્ષરં પુણ્યમેતદેવાક્ષરં પરમ્ ।
એતદેવાક્ષરં જ્ઞાત્વા યો યદિચ્છતિ તસ્ય તત્ ॥ ॥ ૪॥

અથાન્યત્રાપ્યુક્તં સ્વનવત્યેષાસ્યસ્તનુર્યા ઓમિતિ સ્ત્રીપુંનપુંસકેતિ
લિઙ્ગવતી એષાઽથાગ્નિર્વાયુરાદિત્ય ઇતિ ભાસ્વતિ એષા અથ બ્રહ્મ
રુદ્રો
વિષ્ણુરિત્યધિપતિવતી એષાઽથ ગાર્હપત્યો દક્ષિણાગ્નિરાહવનીયા ઇતિ
મુખવતી એષાઽથ ઋગ્યજુઃસામેતિ વિજ્ઞાનવતી એષા
ભૂર્ભુવઃસ્વરિતિ
લોકવતી એષાઽથ ભૂતં ભવ્યં ભવિષ્યદિતિ કાલવતી એષાઽથ
પ્રાણોઽગ્નિઃ
સૂર્ય ઇતિ પ્રતાપવતી એષાઽથાન્નમાપશ્ચન્દ્રમા ઇત્યાપ્યાયનવતી
એષાઽથ બુદ્ધિર્મનોઽહઙ્કારા ઇતિ ચેતનવતી એષાઽથ પ્રાણોઽપાનો
વ્યાન
ઇતિ પ્રાણવતી એષેતિ અત ઓમિત્યુક્તેનૈતાઃ પ્રસ્તુતા અર્ચિતા અર્પિતા
ભવન્તીતિ એવં હ્યાહૈતદ્વૈ સત્યકામ પરાં ચાપરાં
ચ બ્રહ્મ યદોમિત્યેતદક્ષરમિતિ ॥ ૫॥

અથાવ્યાહૃતં વા ઇદમાસીત્ સ સત્યં
પ્રજાપતિસ્તપસ્તપ્ત્વાઽનુવ્યાહરદ્ભૂર્ભુવઃસ્વરિતિ ।
એષૈવાસ્ય પ્રજાપતેઃ સ્થવિષ્ઠા તનુર્યા લોકવતીતિ
સ્વરિત્યસ્યાઃ શિરો નાભિર્ભુવો
ભૂઃ પાદા આદિત્યશ્ચક્ષુઃ ચક્ષુરાયતા હિ પુરુષસ્ય
મહતી માત્રા ચક્ષુષા
હ્યયં માત્રાશ્ચરતિ સત્યં વૈ ચક્ષુઃ
અક્ષિણ્યવસ્થિતો હિ પુરુષઃ સર્વાર્થેષુ ચરતિ
એતસ્માદ્ભૂર્ભુવઃસ્વરિત્યુપાસીતાનેન હિ

પ્રજાપતિર્વિશ્વાત્મા વિશ્વચક્ષુરિવોપાસિતો ભવતીતિ એવં હ્યાહૈષા
વૈ પ્રજાપતેર્વિશ્વભૃત્તનુરેતસ્યામિદં સર્વમન્તર્હિતમસ્મિન્
ચ સર્વસ્મિન્નેષા અન્તર્હિતેતિ તસ્માદેષોપાસીતા ॥ ૬॥

તત્સવિતુર્વરેણ્યમિત્યસૌ વા આદિત્યઃ સવિતા સ વા એવં પ્રવરણીય
આત્મકામેનેત્યાહુર્બ્રહ્મવાદિનોઽથ ભર્ગો દેવસ્ય ધીમહીતિ
સવિતા વૈ દેવસ્તતો યોઽસ્ય ભર્ગાખ્યસ્તં
ચિન્તયામીત્યાહુર્બ્રહ્મવાદિનોઽથ
ધિયો યો નઃ પ્રચોદયાદિતિ બુદ્ધયો વૈ ધિયસ્તાયોઽસ્માકં
પ્રચોદયાદિત્યાહુર્બ્રહ્મવાદિનઃ અથ ભર્ગા ઇતિ યો હ વા અમુષ્મિન્નાદિત્યે
નિહિતસ્તારકોઽક્ષિણિ વૈષ ભર્ગાખ્યઃ ભાભિર્ગતિરસ્ય હીતિ ભર્ગઃ
ભર્જયતીતિ
વૈષ ભર્ગ ઇતિ રુદ્રો બ્રહ્મવાદિનોઽથ ભ ઇતિ ભાસયતીમાન્ લોકાન્ ર
ઇતિ
રંજયતીમાનિ ભૂતાનિ ગ ઇતિ ગચ્છન્ત્યસ્મિન્નાગચ્છન્ત્યસ્માદિમાઃ
પ્રજાસ્તસ્માદ્ભ-રગ-ત્વાદ્ભર્ગઃ શાશ્વત્ સૂયમાનાત્ સૂર્યઃ સવનાત્
સવિતાઽદાનાત્ આદિત્યઃ પવનાત્પાવનોઽથાપોપ્યાયનાદિત્યેવં હ્યાહ
ખલ્વાત્મનોઽત્મા નેતામૃતાખ્યશ્ચેતા મન્તા ગન્તોત્સૃષ્ટાનન્દયિતા
કર્તા વક્તા રસયિતા ઘ્રાતા દ્રષ્ટા શ્રોતા સ્પૃશતિ ચ વિભુર્વિગ્રહે
સન્નિવિષ્ટા ઇત્યેવં હ્યાહ અથ યત્ર દ્વૈતીભૂતં વિજ્ઞાનં તત્ર હિ
શ઼ૃણોતિ
પશ્યતિ જિઘ્રતિ રસયતિ ચૈવ સ્પર્શયતિ સર્વમાત્મા જાનીતેતિ
યત્રાદ્વૈતીભૂતં
વિજ્ઞાનં કાર્યકારણકર્મનિર્મુક્તં નિર્વચનમનૌપમ્યં નિરુપાખ્યાં
કિં તદવાચ્યમ્ ॥ ૭॥

એષ હિ ખલ્વાત્મેશાનઃ શમ્ભુર્ભવો રુદ્રઃ પ્રજાપતિર્વિશ્વસૃક્
હિરણ્યગર્ભઃ સત્યં પ્રાણો હંસઃ શાસ્તા વિષ્ણુર્નારાયણોઽર્કઃ
સવિતા ધાતા વિધાતા સમ્રાડિન્દ્ર ઇન્દુરિતિ ય એષ તપત્યગ્નિરિવાગ્નિના
પિહિતઃ સહસ્રાક્ષેણ હિરણ્મયેનાણ્ડેન એષ વા જિજ્ઞાસિતવ્યોઽન્વેષ્ટવ્યઃ
સર્વભૂતેભ્યોઽભયં દત્વારણ્યં ગત્વાથ
બહિઃકૃત્વીન્દ્રિયાર્થાન્સ્વાચ્છરીરાદુપલભેત એનમિતિ ।
વિશ્વરૂપં હરિણં જાતવેદસં પરાયણં જ્યોતિરેકં તપન્તમ્ ।

સહસ્રરશ્મિઃ શતધા વર્તમાનઃ પ્રાણઃ પ્રજાનામુદયત્યેષ સૂર્યઃ ॥

॥ ૮॥

તસ્માદ્વા એષ ઉભયાત્મૈવં વિદાત્મન્યેવાભિધ્યાયત્યાત્મન્યેવ
યજતીતિ ધ્યાનં પ્રયોગસ્થં મનો વિદ્વદ્ભિષ્ટુતં
મનઃપૂતિમુચ્છિષ્ટોપહતમિત્યનેન તત્પાવયેત્  મન્ત્રં પઠતિ
ઉચ્છિષ્ટોચ્છિષ્ટોપહિતં યચ્ચ પાપેન દત્તં મૃતસૂતકાદ્વા
વસોઃ પવિત્રમગ્નિઃ સવિતુશ્ચ રશ્મયઃ પુનન્ત્વન્નં મમ દુષ્કૃતં
ચ યદન્યત્  અદ્ભિઃ પુરસ્તાત્પરિદધાતિ  પ્રાણાય સ્વાહાપાનાય
સ્વાહા વ્યાનાય સ્વાહા સમાનાય સ્વાહોદાનાય સ્વાહેતિ
પઞ્ચભિરભિજુહોતિ
અથાવાશિષ્ટં યતવાગશ્નાત્યતોઽદ્ભિર્ભૂય
એવોપરિષ્ટાત્પરિદધાત્યાચાન્તો
ભૂત્વાત્મેજ્યાનઃ પ્રાણોઽગ્નિર્વિશ્વોઽસીતિ ચ
દ્વાભ્યામાત્માનમભિધ્યાયેત્
પ્રાણોઽગ્નિઃ પરમાત્મા વૈ પઞ્ચવાયુઃ સમાશ્રિતઃ  સ પ્રીતઃ પ્રીણાતુ
વિશ્વં
વિશ્વભુક્  વિશ્વોઽસિ વૈશ્વાનરોઽસિ વિશ્વં ત્વયા
ધાર્યતે જાયમાનમ્  વિશન્ તુ ત્વામાહુતયશ્ચ
સર્વાઃ પ્રજાસ્તત્ર યત્ર વિશ્વામૃતોઽસીતિ એવં ન વિધિના
ખલ્વનેનાત્તાનત્વં પુનરુપૈતિ ॥ ૯॥

અથાપરં વેદિતવ્યમુત્તરો વિકારોઽસ્યાત્મયજ્ઞસ્ય યથાન્નમન્નાદશ્ચેતિ

અસ્યોપવ્યાખ્યાનં  પુરુષશ્ચેતા પ્રધાનાન્તઃસ્થઃ  સ એવ ભોક્તા
પ્રાકૃતમન્નં ભુઙ્ક્ત ઇતિ તસ્યાયં ભૂતાત્મા હ્યન્નમસ્યકર્તા
પ્રધાનઃ
તસ્માત્રિગુણં ભોજ્યં ભોક્તા પુરુષોઽન્તસ્થઃ  અત્ર દૃષ્ટં નામ
પ્રત્યયમ્
યસ્માદ્બીજસમ્ભવા હિ પશવસ્તસ્માદ્બીજં ભોજ્યમનેનૈવ પ્રધાનસ્ય
ભોજ્યત્વં
વ્યાખ્યાતં  તસ્માદ્ભોક્તા પુરુષો ભોજ્યા પ્રકૃતિસ્તત્સ્થો ભુઙ્ક્ત ઇતિ
પ્રાકૃતમન્નં

ત્રિગુણભેદપરિણમત્વાન્મહદાદ્યં વિશેષાન્તં લિઙ્ગમનેનૈવ
ચતુર્દશવિધસ્ય
માર્ગસ્ય વ્યાખ્યા કૃતા ભવતિ   સુખદુઃખમોહસંજ્ઞં
હ્યન્નભૂતમિદં જગત્
ન હિ બીજસ્ય સ્વાદુપરિગ્રહોઽસ્તીતિ યાવન્નપ્રસૂતિઃ  તસ્યાપ્યેવં
તિસૃષ્વવસ્થાસ્વન્નત્વં
ભવતિ  કૌમારં યૌવનં જરા પરિણમત્વાતત્દન્નત્વમેવં પ્રધાનસ્ય
વ્યક્તતાં
ગતસ્યોપલબ્ધિર્ભવતિ  તત્ર બુદ્ધ્યાદીનિ સ્વાદુનિ
ભવન્ત્યધ્યવસાયસઙ્કલ્પાભિમાના ઇતિ
અથેન્દ્રિયાર્થાન્      પઞ્ચસ્વાદુનિ ભવન્તિ  એવં સર્વાણીન્દ્રિયકર્માણિ
પ્રાણકર્માણિ
એવં વ્યક્તમન્નમવ્યક્તમન્નમ્  અસ્ય નિર્ગુણો ભોક્તા
ભોક્તૃત્વાચ્ચૈતન્યં
પ્રસિદ્ધં તસ્ય  યથાગ્નિર્વૈ દેવાનામન્નદઃ
સોમોઽન્નમગ્નિનૈવાન્નમિત્યેવંવિત્
સોમસંજ્ઞોઽયંભૂતત્માઽગ્નિસંજ્ઞોઽપ્યવ્યક્તમુખા ઇતિ  વચનાત્પુરુષો
હ્યવ્યક્તમુખેન ત્રિગુણં ભુઙ્ક્ત ઇતિ  યો હૈવં વેદ સંન્યાસી યોગી
ચાત્મયાજી ચેતિ  અથ યદ્વન્ન કશ્ચિચ્છૂન્યાગારે કામિન્યઃ
પ્રવિષ્ટાઃ સ્પૃશતીન્દ્રિયાર્થાન્ તદ્વદ્ યો ન સ્પૃશતિ
પ્રવિષ્ટાન્ સંન્યાસી યોગી ચાત્મયાજી ચેતિ  ॥  ૧૦॥

પરં વા એતદાત્મનો રૂપં યદન્નમન્નમયો હ્યયં પ્રાણોઽથ ન
યદ્યશ્નાત્યમન્તાઽશ્રોતાઽસ્પ્રષ્ટાઽદ્રષ્ટાઽવક્તાઽઘ્રાતારસયિતા
ભવતિ  પ્રાણાંશ્ચોત્સૃજતીતિ  એવં હ્યાહાથ યદિ ખલ્વશ્નાતિ
પ્રાણસમૃદ્ધો
ભૂત્વા મન્તા ભવતિ  શ્રોતા ભવતિ
સ્પ્રષ્ટા ભવતિ  વક્તા ભવતિ  રસયિતા
ભવતિ  ઘ્રાતા ભવતિ  દ્રષ્ટા ભવતીતિ  એવં હ્યાહ અન્નાદ્વૈ પ્રજાઃ
પ્રજાયન્તે
યાઃ કશ્ચિત્પૃથિવીશ્ૃતાઃ ।  અતોઽન્નેનૈવ જીવન્તિ  અથૈતદપિ યન્તિ
અન્તતઃ ॥ ૧૧॥

અથાન્યત્રાપિ ઉક્તમ્  સર્વાણિ હ વા ઇમાનિ ભૂતાન્યહરહઃ
પ્રપતન્ત્યન્નમભિજિઘૃક્ષમાણાનિ  સૂર્યો રશ્મિભિરાદદાત્યન્નં
તેનાસૌ તપત્યન્નેનાભિષિક્તાઃ પચન્તીમે પ્રાણા  અગ્નિર્વા
અન્નેનોજ્જ્વલત્યન્નકામેનેદં પ્રકલ્પિતં બ્રહ્મણા
અતોઽન્નમાત્મેત્યુપાસીતેત્વેયં
હ્યાહ । અનાદ્ભૂતાનિ જાયન્તે  જાતાન્યન્નેન
વર્ધન્તે  અદ્યતેઽત્તિ ચ ભૂતાનિ
તસ્માદન્નં તદુચ્યતે ॥ ૧૨ ॥

અથાન્યત્રાપિ ઉક્તમ્ : વિશ્વભૃદ્વૈ નામૈષા તનુર્ભગવતો
વિષ્ણોર્યદિદમન્નં  પ્રાણો વા અન્નસ્ય રસો મનઃ પ્રાણસ્ય
વિજ્ઞાનં મનસ  આનન્દં વિજ્ઞાનસ્યેતિ  અન્નવાન્  પ્રાણવાન્
મનશ્વાન્  વિજ્ઞાનવાન્  આનન્દવાન્ ચ ભવતિ યો હૈવં વેદ
યાવાન્તીહ વૈ ભૂતાન્યન્નમદન્તિ તાવત્સ્વન્તસ્થોઽન્નમત્તિ યો હૈવંવેદ
।
અન્નમેવ વિજરન્નમન્નં સંવનનં સ્મૃતમ્ । અન્નં પશૂનાં
પ્રાણોઽન્નં જ્યેષ્ઠમન્નં ભિષક્ સ્મૃતમ્ ॥ ૧૩ ॥

અથાન્યાત્રપ્યુક્તમ્ : અન્નં વા અસ્ય સર્વસ્ય યોનિઃ  કાલશ્ચાન્નસ્ય
સૂર્યો યોનિઃ કાલસ્ય  તસ્યૈતદ્રૂપં યન્ નિમેષાદિકાલાત્સમ્ભૃતં
દ્વાદશાત્મકં વત્સરમેતસ્યાગ્નેયમર્ધમર્ધં વારુણં  મઘાદ્યં
શ્રવિષ્ઠાર્ધમાગ્નેયં ક્રમેણોત્ક્રમેણ સાર્પાદ્યં શ્રવિષ્ઠાર્ધાન્તં
સૌમ્યમ્  તત્રૈકૈકમાત્મનો નવાંશકં સચારકવિધમ્
સૌક્ષ્મ્યત્વાદેતત્પ્રમાણમનેનૈવ પ્રમીયતે હિ કાલઃ  ન વિના પ્રમાણેન
પ્રમેયસ્યોપલબ્ધિઃ  પ્રમેયોઽપિ પ્રમાણતાં
પૃથક્ત્વાદુપૈત્યાત્મસમ્બોધનાર્થમિત્યેવં
હ્યાહ । યાવત્યો વૈ કાલસ્ય કલાસ્તાવતીષુ ચરત્યસૌ  યઃ કાલં
બ્રહ્મેત્યુપાસીત
કાલસ્તસ્યાતિદૂરમપસરતીતિ  એવં હ્યાહ  :

કાલાત્સ્રવન્તિ ભૂતાનિ  કાલાદ્વૃદ્ધિં પ્રયાન્તિ ચ ।
કાલે ચાસ્તં નિયચ્છન્તિ કાલો મૂર્તિરમૂર્તિમાન્ ॥ ॥ ૧૪ ॥

દ્વે વાવ બ્રહ્મણો રુપે કાલશ્ચાકાલશ્ચાથ યઃ
પ્રાગાદિત્યાત્સોઽકાલોઽકાલોઽથ

ય આદિત્યદ્યઃ સ કાલઃ  સકલઃ  સકલસ્ય વા એતદ્રૂપં યત્સંવત્સરઃ
સંવત્સરાત્ખલ્વેવેમાઃ પ્રજાઃ પ્રજાયન્તે  સંવત્સરેણેહ વૈ જાતા
વિવર્ધન્તે
સંવત્સરે પ્રત્યસ્તં યન્તિ  તસ્માત્સંવત્સરો વૈ પ્રજાપતિઃ કાલોઽન્નં
બ્રહ્મનીડમાત્મા
ચેત્યેવં હ્યાહ

કાલઃ પચતિ ભૂતાનિ સર્વાણ્યેવ મહાત્મનિ ।
યસ્મિન્ તુ પચ્યતે કાલો યસ્તં વેદ સ વેદવિત્ ॥  ॥ ૧૫॥

વિગ્રહવાનેષ કાલઃ સિન્ધુરાજઃ પ્રજાનામ્  એષ તત્સ્થઃ સવિતાખ્યો
યસ્માદેવેમે ચન્દ્રર્ક્ષગ્રહ સંવત્સરાદયઃ સૂયન્તે  અથૈભ્યઃ
સર્વમિદમત્ર વા યત્કિઞ્ચિત્શુભાશુભં દૃશ્યન્તેહ લોકે
તદેતેભ્યસ્તસ્માદાદિત્યાત્મા બ્રહ્માથ કાલસંજ્ઞમાદિત્યમુપાસીતાદિત્યો
બ્રહ્મેત્યેકેઽથ એવં હ્યાહ ।

હોતા ભોક્તા હવિર્મન્ત્રો યજ્ઞો વિષ્ણુઃ પ્રજાપતિઃ ।
સર્વઃ કશ્ચિત્પ્રભુઃ સાક્ષી યોઽમુષ્મિન્ભાતિ મણ્ડલે ॥  ॥ ૧૬॥

બ્રહ્મ હ વા ઇદમગ્ર આસીત્  એકોઽનન્તઃ  પ્રાગનન્તો દક્ષિણોઽનન્તઃ
પ્રતીચ્યનન્ત ઉદીચ્યનન્ત ઊર્ધ્વાન્  ચાઽવાન્ ચ સર્વતોઽનન્તઃ
ન હ્યાસ્ય પ્રાચ્યાદિ દિશઃ કલ્પન્તેઽથ તિર્યગ્વાન્ ચોર્ધ્વં વા
અનૂહ્ય એષ પરમાત્માઽપરિમિતોઽતર્ક્યોઽચિન્ત્ય એષ આકાશાત્મા
એવૈષ કૃત્સ્નક્ષય એકો જાગર્તીતિ  એતસ્માદાકાશાદેષ ખલ્વિદં
ચેતામાત્રં બોધયતિ   અનેનૈવ ચેદમ્ ધ્યાયતે અસ્મિન્ ચ પ્રત્યસ્તં
યાતિ   અસ્યૈતદ્ભાસ્વરં રૂપં યદમુષ્મિન્નાદિત્યે તપતિ  અગ્નૌ
ચાધુમકે
યજ્જ્યોતિશ્ચિત્રતરમુદરસ્તોઽથ વા યઃ પચત્યન્નમ્   ઇત્યેવં હ્યાહ
યશ્ચૈષોઽગ્નૌ
યશ્ચાયં હૃદયે યશ્ચાસાવાદિત્યે સ એષ એકા ઇત્યેકસ્ય હૈકત્વમેતિ
ય એવં વેદ ॥ ૧૭॥

તથા તત્પ્રયોગકલ્પઃ પ્રાણાયામઃ પ્રત્યાહારો ધ્યાનં ધારણા
તર્કઃ સમાધિઃ ષડઙ્ગા ઇત્યુચ્યતે યોગઃ  અનેન યદા પશ્યન્પશ્યતિ
રુક્મવર્ણં કર્તારમીશં પુરુષં બ્રહ્મયોનિમ્   તદા વિદ્વાન્પુણ્યપાપે
વિહાય પરેઽવ્યયે સર્વમેકીકરોતિ  એવં હ્યાહ   :

યથા પર્વતમાદીપ્તં નાશ્રયન્તિ મૃગદ્વિજાઃ ।
તદ્વદ્બ્રહ્મવિદો દોષા નાશ્રયન્તિ કદાચન ॥

॥ ૧૮॥

અથાન્યત્રાપ્યુક્તમ્ : યદા વૈ બહિર્વિદ્વાન્મનો નિયમ્યેન્દ્રિયાર્થાન્
ચ પ્રાણો નિવેશયિત્વા નિઃસઙ્કલ્પસ્તતસ્તિષ્ઠેત્ અપ્રાણાદિહ
યસ્માત્સમ્ભૂતઃ પ્રાણસંજ્ઞકો જીવસ્તસ્માત્પ્રાણો વૈ તુર્યાખ્યે
ધારયેત્પ્રાણમ્ ઇત્યેવં હ્યાહ :

અચિત્તં ચિત્તમધ્યસ્તમચિન્ત્યં ગુહ્યમુત્તમમ્ ।
તત્ર ચિત્તં નિધાયેત તચ્ચ લિઙ્ગં નિરાશ્રયમ્ ॥ ॥ ૧૯॥

અથાન્યત્રાપ્યુક્તમ્ : અતઃ પરાસ્ય ધારણા તાલુરસનાગ્રનિપીડના-
દ્વાઙ્મનઃપ્રાણનિરોધનાદ્બ્રહ્મ તર્કેણ પશ્યતિ યદાત્મનાઽઽત્માન-
મણોરણીયાંસં દ્યોતમાનં મનઃક્ષયાત્પશ્યતિ તદાત્મનાત્માનં
દૃષ્ટ્વા નિરાત્મા ભવતિ નિરાત્મકત્વાદસઙ્ખ્યોઽયોનિશ્ચિન્ત્યો
મોક્ષલક્ષણમિત્યેતત્પરં રહસ્યમ્ ઇત્યેવં હ્યાહ :

ચિત્તસ્ય હિ પ્રસાદેન હન્તિ કર્મ શુભાશુભમ્ ।
પ્રસન્નાત્માત્મનિ સ્થિત્વા સુખમવ્યયમશ્નુતા ઇતિ ॥ ॥ ૨૦॥

અથાન્યત્રાપ્યુક્તમ્ : ઊર્ધ્વગા નાડી સુષુમ્નાખ્યા
પ્રાણસઞ્ચારિણી
તાલ્વન્તર્વિચ્છિન્ના તયા પ્રાણોઙ્કારમનોયુક્તયોર્ધ્વમુત્ક્રમેત્
તાલ્વધ્યાગ્રં
પરિવર્ત્ય ઇન્દ્રિયાણ્યસંયોજ્ય મહિમા મહિમાનં નિરીક્ષેતા તતો
નિરાત્વકમેતિ
નિરાત્મકત્વાન્ન સુખદુઃખભાગ્ભવતિ કેવલત્વં લભતા ઇત્યેવં
હ્યાહ :

પરઃ પૂર્વં પ્રતિષ્ઠાપ્ય નિગૃહીતાનિલં તતઃ ।
તીર્ત્વા પારમપારેણ પશ્ચાદ્યુઞ્જીત મૂર્ધ્વનિ ॥ ॥ ૨૧॥

અથાન્યત્રાપ્યુક્તમ્ : દ્વે વા વ બ્રહ્મણી અભિધ્યેયે
શબ્દશ્ચાશબ્દશ્ચ
અથ શબ્દેનૈવાશબ્દમાવિષ્ક્રિયતે અથ તત્ર ઓમિતિ
શબ્દોઽનેનોર્ધ્વમુત્ક્રાન્તોઽશબ્દે

નિધનમેતિ  અથાહૈષા ગતિરેતદમૃતમ્  અતત્સાયુજ્યત્વમ્
નિર્વૃતત્વમ્ તથા ચેતિ
અથ યથોર્ણનાભિસ્તન્તુનોર્ધ્વમુત્ક્રાન્તોઽવકાશં લભતીત્યેવં વા વ
ખલ્વાસાવભિધ્યાતા ઓમિત્યનેનોર્ધ્વમુત્ક્રાન્તઃ સ્વાતન્ત્ર્યં લભતે
અન્યથા પરે શબ્દવાદિનઃ :
શ્રવણાઙ્ગુષ્ઠયોગેનાન્તર્હૃદયાકાશશબ્દમાકર્ણયન્તિ  સપ્તવિધેયં
તસ્યોપમા  યથા નદ્યઃ કિઙ્કિણી કાંસ્યચક્રકભેક વિઃકૃન્દિકા
વૃષ્ટિર્નિવાતે
વદતીતિ  તં પૃથગ્લક્ષણમતીત્ય પરેઽશબ્દેઽવ્યક્તે બ્રહ્મણ્યસ્તં
ગતાઃ  તત્ર તેઽપૃથગ્ધર્મિણોઽપૃથગ્વિવેક્યા યથા સમ્પન્ના
મધુત્વં નાનારસા ઇત્યેવં હ્યાહ   :

દ્વે બ્રહ્મણિ વેદિતવ્યે  શબ્દબ્રહ્મ પરાં ચ યત્ ।
શબ્દબ્રહ્મણિ નિષ્ણાતઃ  પરં બ્રહ્માધિગચ્છતિ ॥          ॥ ૨૨ ॥

અથાન્યત્રાપ્યુક્તમ્  :  યઃ શબ્દસ્તદોમિત્યેતદક્ષરમ્
યદસ્યાગ્રં તચ્છાન્તમશબ્દમભયમશોકમાનન્દં તૃપ્તં
સ્થિરમચલમમૃતમચ્યુતં ધ્રુવં વિષ્ણુસંજ્ઞિતં  સર્વાપરત્વાય
તદેતા ઉપસીતેત્યેવં હ્યાહ   :

યોઽસૌ પરાપરો દેવા   ૐકારો નામ નામતઃ ।
નિઃશબ્દઃ શૂન્યભૂતસ્તુ   મૂર્ધ્નિ સ્થાને તતોઽભ્યસેત્ ॥     ॥ ૨૩ ॥

અથાન્યત્રાપ્યુક્તમ્  :  ધનુઃ શરીરમ્  ઓમિત્યેતચ્છરઃ
શિખાસ્ય મનઃ  તમોલક્ષણં   ભિત્વા તમોઽતમાવિષ્ટમાગચ્છતિ
અથાવિષ્ટં ભિત્વાઽલાતચક્રમિવ સ્ફુરન્તમાદિત્યવર્ણમૂર્જસ્વન્તં
બ્રહ્મ તમસઃ પર્યમપશ્યદ્યદમુષ્મિન્નાદિત્યેઽથ સોમેઽગ્નૌ
વિદ્યુતિ વિભાતિ   અથ ખલ્વેનં દૃષ્ટ્વાઽમૃતત્વં ગચ્છતીત્યેવં
હ્યાહ   :

ધ્યાનમન્તઃપરે તત્ત્વે લક્ષ્યેષુ ચ નિધીયતે ।
અતોઽવિશેષવિજ્ઞાનં વિશેષમુપગચ્છતિ ॥

માનસે ચ વિલીને તુ યત્સુખં ચાત્મસાક્ષિકમ્ ।
તદ્બ્રહ્મ ચામૃતં શુક્રં સા ગતિર્લોક એવ સઃ ॥          ॥ ૨૪ ॥

અથાન્યત્રાપ્યુક્તમ્  :  નિદ્રેવાન્તર્હિતેન્દ્રિયઃ શુદ્ધિતમયા

ધિયા સ્વપ્ન ઇવ યઃ પશ્યતીન્દ્રિયબિલેઽવિવશઃ પ્રણવાખ્યં
પ્રણેતારં ભારૂપં વિગતનિદ્રં વિજરં વિમૃત્યું વિશોકં
ચ સોઽપિ પ્રણવાખ્યઃ પ્રણેતા ભારૂપઃ વિગત નિદ્રઃ વિજરઃ
વિમૃત્યુર્વિશોકો ભવતીત્યેવં હ્યાહ :

એવં પ્રાણમથોઙ્કારં યસ્માત્સર્વમનેકધા ।
યુનક્તિ યુઞ્જતે વાપિ યસ્માદ્યોગ ઇતિ સ્મૃતઃ ॥

એકત્વં પ્રાણમનસોરિન્દ્રિયાણાં તથૈવ ચ ।
સર્વભાવપરિત્યાગો યોગ ઇત્યભિધીયતે ॥ ॥ ૨૫॥

અથાન્યત્રાપ્યુક્તમ્ : યથા વાપ્સુ ચારિણઃ શાકુનિકઃ
સૂત્રયન્ત્રેણોદ્ધૃત્યોદરેઽગ્નૌ જુહોત્યેવં વા વ
ખલ્વિમાન્પ્રાણાનોમિત્યનેનોદ્ધૃત્યાનામયેઽગ્નૌ જુહોતિ
અતસ્તપ્તોર્વિવસોઽથ યથા તપ્તોર્વિ સાર્પિસ્તૃણકાષ્ઠસંસ્પર્શે-
નોજ્જ્વલતીત્યેવં વા વ ખલ્વસાવપ્રાણાખ્યઃ પ્રાણસંસ્પર્શેનોજ્જ્વલતિ
અથ યદુજ્જ્વલત્યેતદ્બ્રહ્મણો રૂપં ચૈતદ્વિષ્ણોઃ પરમં પદમ્
ચૈતદ્રુદ્રસ્ય રુદ્રત્વમેતત્તદપરિમિતધા ચાત્માનં વિભજ્ય
પૂરયતીમાં લોકાનિત્યેવં હ્યાહ :

વહ્નેશ્ચ યદ્વત્ખલુ વિસ્ફુલિઙ્ગાઃ સૂર્યાન્મયૂખાશ્ચ તથૈવ
તસ્ય
પ્રાણાદયો વૈ પુનરેવ તસ્માદ્ અભ્યુચ્ચરન્તીહ યથાક્રમેણ ॥

॥ ૨૬॥

અથાન્યત્રાપ્યુક્તમ્ : બ્રહ્મણો વા વૈતત્તેજઃ પરસ્યામૃતસ્યાશરીરસ્ય
યચ્છરીરસ્યૌષ્ણ્યમસ્યૈતદ્ઘૃતમથાવિઃ સન્ નભસિ નિહિતં
વૈતદેકાગ્રેણૈવમન્તર્હૃદયાકાશં વિનુદન્તિ યત્તસ્ય જ્યોતિરિવ
સમ્પદ્યતીતિ અતસ્તદ્ભાવમ્ અચિરેણૈતિ ભૂમાવયસ્પિણ્ડં નિહિતં
યથાઽચિરેણૈતિ ભૂમિત્વમ્ મૃદ્વત્સંસ્થમયસ્પિણ્ડં
યથાગ્ન્યયસ્કારાદયો
નાભિભવન્તિ પ્રણશ્યતિ ચિત્તં તથાશ્રયેણ સહૈવમિત્યેવં હ્યાહ :

હૃદ્યાકાશમયં કોશમાનન્દં પરમાલયમ્ ।
સ્વં યોગશ્ચ તતોઽસ્માકં તેજશ્ચૈવાગ્નિસૂર્યયોઃ ॥ ॥ ૨૭॥

અથાન્યત્રાપ્યુક્તમ્ : ભૂતેન્દ્રિયાર્થાનતિક્રમ્ય તતઃ પ્રવ્રજ્યાજ્યં

ધૃતિદણ્ડં ધનુર્ગૃહીત્વાઽનભિમાનમયેન ચૈવેષુણા તં બ્રહ્મ
દ્વારપારં નિહત્યાદ્યં સંમોહમૌલી તૃષ્ણેર્ષ્યાકુણ્ડલી
તન્દ્રીરાઘવેત્ર્યભિમાનાધ્યક્ષઃ ક્રોધજયં પ્રલોભદણ્ડં
ધનુર્ગૃહીત્વેચ્છામયેન ચૈવેષુણેમાનિ ખલુ ભૂતાનિ હન્તિ
તં હત્વોંકારપ્લવેનાન્તર્હૃદયાકાશસ્ય પારં તીર્ત્વાવિર્ભૂતે
અન્તરાકાશે શનકૈરવટૈવાવટકૃદ્ધાતુકામઃ સંવિશત્યેવં
બ્રહ્મશાલાં વિશેત્  તતશ્ચતુર્જાલં બ્રહ્મકોશં પ્રણુદેત્
ગુર્વાગમેનેતિ  :
અતઃ શુદ્ધઃ પૂતઃ શૂન્યઃ શાન્તોઽપ્રાણો નિરાત્માઽનન્તોઽક્ષય્યઃ
સ્થિરઃ શાશ્વતોઽજઃ સ્વતન્ત્રઃ સ્વે મહિમ્નિ તિષ્ઠતિ અતઃ સ્વે મહિમ્નિ
તિષ્ઠમાનમ્  દૃષ્ટ્વાઽવૃત્તચક્રમિવ સઞ્ચારચક્રમાલોકયતિ
ઇત્યેવં હ્યાહ   :

ષડ્ભિર્માસૈસ્તુ યુક્તસ્ય નિત્યમુક્તસ્ય દેહિનઃ
અનન્તઃ પરમો ગુહ્યઃ સમ્યગ્યોગઃ પ્રવર્તતે ॥

રજસ્તમોભ્યાં વિદ્ધસ્ય સુસમિદ્ધસ્ય દેહિનઃ
પુત્રદારકુટુમ્બેષુ સક્તસ્ય ન કદાચન ॥ ॥ ૨૮॥

એવમુક્ત્વાઽન્તર્હૃદયઃ શકાયન્યસ્તસ્મૈ નમસ્કૃત્વાઽનયા
બ્રહ્મવિદ્યયા રાજન્ બ્રહ્મણઃ પન્થાનમારૂઢાઃ પુત્રાઃ
પ્રજાપતેરિતિ  સન્તોષં દ્વન્દ્વતિતિક્ષાં શાન્તત્વં
યોગાભ્યાસાદવાપ્નોતીતિ
એતદ્ગુહ્યતમં નાપુત્રાય નાશિષ્યાય નાશાન્તાય કીર્તયેદિતિ
અનન્યભક્તાય સર્વગુણસમ્પન્નાય દદ્યાત્ ॥ ॥ ૨૯॥

ૐ શુચૌ દેશે શુચિઃ સત્ત્વસ્થઃ સદધીયાનઃ સદ્વાદી
સદ્ધ્યાયી સદ્યાજી સ્યાદિતિ । અતઃ સદ્બ્રહ્મણિ સત્યભિલાષિણિ
નિર્વૃત્ત્યોઽનસ્તત્ફલચ્છિન્નપાશો નિરાશઃ પરેષ્વાત્મવદ્વિગતભયો
નિષ્કામોઽક્ષય્યમપરિમિતં સુખમાક્રમ્ય તિષ્ઠતિ । પરમં
વૈ શેવધેરિવ પરસ્યોદ્ધરણં યન્નિષ્કામત્વમ્ । સ હિ સર્વકામમયઃ
પુરુષોઽધ્યવસાયસઙ્કલ્પાભિમાનલિઙ્ગો બદ્ધઃ । અતસ્તદ્વિપરીતો મુક્તઃ ।
અત્રૈક આહુર્ગુણઃ પ્રકૃતિભેદવશાસધ્યવસાયાત્મબન્ધમુપાગતો।
અધ્યવસાયસ્ય દોષક્ષયાદ્ધિ મોક્ષઃ  મનસા હ્યેવ પશ્યતિ  મનસા
શ◌ૃણોતિ  કામઃ સઙ્કલ્પો વિચિકિત્સા શ્રદ્ધાઽશ્રદ્ધા

ધૃતિરધૃતિર્હ્રીર્ધીર્ભીરિત્યેતત્સર્વં મન એવ  ગુણૌઘૈરુહ્યમાનઃ
કલુષીકૃતશ્ચાસ્થિરશ્ચલો લુપ્યમાનઃ સસ્પૃહો
વ્યગ્રશ્ચાભિમાનિત્વં
પ્રયાત ઇતિ  અહં સો મમેદમિત્યેવં મન્યમાનો નિબધ્નાત્યાત્મનાત્માનં્
જાલેનેવ ખેચરઃ । અતઃ પુરુષોઽધ્યાવસાયસઙ્કલ્પાબિમાનલિઙ્ગો બદ્ધઃ
અતસ્તદ્વિપરીતો મુક્તઃ  તસ્માન્નિરધ્યવસાયો નિઃસઙ્કલ્પો
નિરભિમાનસ્તિષ્ઠેત્
એતન્મોક્ષલક્ષણમ્  એષાત્ર બ્રહ્મપદવી એષોઽત્ર દ્વારવિવરોઽનેનાસ્ય
તમસઃ પારં ગમિષ્યતિ । અત્ર હિ સર્વે કામાઃ સમાહિતા
ઇત્યત્રોદાહરન્તિ   :

યદા પઞ્ચાવતિષ્ઠન્તે જ્ઞાનાનિ મનસા સહ ।
બુદ્ધિશ્ન ન વિચેષ્ટતે તામાહુઃ પરમાં ગતિમ્  ॥

એતદુક્ત્વાન્તર્હૃદયઃ શાકાયન્યસ્તસ્મૈ નમસ્કૃત્વા યથાવદુપચારી
કૃતકૃત્યો મરુદુત્તરાયણં ગતો  ન હ્યત્રોદ્વર્ત્મના ગતિઃ  એષોઽત્ર
બ્રહ્મપથઃ  સૌરં સ્દ્વારં ભિત્ત્વોર્દ્ધ્વેન વિનિર્ગતા  ઇત્યત્રોદાહરન્તિ
:

અનન્તા રશ્મયસ્તસ્ય દીપવદ્યઃ સ્થિતો હૃદિ ।
સિતાસિતાઃ કદ્રુનીલાઃ કપિલા મૃદુલોહિતાઃ ॥

ઊર્ધ્વમેકઃ સ્થિતસ્તેષાં યો ભિભિત્વા સૂર્યમણ્ડલમ્ ।
બ્રહ્મલોકમતિક્રમ્ય તેન યાન્તિ પરાં ગતિમ્ ॥

યદસ્યાન્યદ્રશ્મિશતમૂર્ધ્વમેવ વ્યવસ્થિતમ્ ।
તેન દેવનિકાયાનાં સ્વધામાનિ પ્રપદ્યતે ॥

યે નૈકરૂપાશ્ચાધસ્તાદ્રશ્મયોઽસ્ય મૃદુપ્રભાઃ ।
ઇહ કર્મોપભોગાય તૈઃ સંસરતિ સોઽવષઃ ।
તસ્માત્સર્ગસ્વર્ગાપવર્ગહેતુર્ભગવાનસાવાદિત્ય ઇતિ ॥

॥ ૩૦॥

કિમાત્મકાનિ વા એતાનીન્દ્રિયાણિ પ્રચરન્ત્યુદ્ગન્તા ચૈતેષામિહ
કો નિયન્તા વેત્યાહ । પ્રત્યાહાત્માત્મકાનીત્યાત્મા હ્યેષામુદ્ગન્તા
વાપ્સરસો ભાનવીયાશ્ચ મરીચયો નામ  અથ પઞ્ચભિઃ
રશ્મિભિર્વિષયાનત્તિ  કતમ આત્મેતિ  યોઽયં શુદ્ધઃ પૂતઃ

શૂન્યઃ શાન્તાદિલક્ષણોક્તઃ સ્વકૈર્લિઙ્ગૈરુપગૃહ્યઃ
તસ્યૈતલ્લિઙ્ગમલિઙ્ગસ્યાગ્નેર્યદૌષ્ણ્યમાવિષ્ટં ચાપાં યઃ
શિવતમોરસ ઇત્યેકે । અથ વાક્શ્રોત્રં ચક્ષુર્મનઃ પ્રાણ ઇત્યેકે,
અથ બુદ્ધિર્ધૃતિઃ સ્મૃતિઃ પ્રજ્ઞા તદિત્યેકે  અથ તે એતસ્યૈવં
યથૈવેહ બીજસ્યાઙ્કુરાવાથધૂમાર્ચિર્વિષ્ફુલિઙ્ગા ઇવાગ્નેશ્ચેતિ
અત્રોદાહરન્તિ   :

વહ્નેશ્ચ યદ્વત્ખલુ વિષ્ફુલિઙ્ગાઃ
સૂર્યાન્મયૂખાશ્ચ તથૈવ તસ્ય ।
પ્રાણાદયો વૈ પુનરેવ તસ્મા-
દભ્યુચ્ચરન્તીહ યથાક્રમેણ ॥ ॥ ૩૧॥

તસ્માદ્વા એતસ્માદાત્મનિ સર્વે પ્રાણાઃ  સર્વે લોકાઃ  સર્વે વેદાઃ
સર્વે દેવાઃ  સર્વાણિ ચ ભૂતાન્યુચ્ચરન્તિ તસ્યોપનિષત્સત્યસ્ય સત્યમિતિ

અથ યથાર્દ્રૈધાગ્નેરભ્યાહિતસ્ય પૃથગ્ધૂમા નિશ્ચરન્ત્યેવં વા
એતસ્ય મહતો
ભૂતસ્ય નિઃશ્વસિતમેતદ્યદૃગ્વેદો યજુર્વેદઃ સામવેદોઽથર્વાઙ્ગિરસા
ઇતિહાસઃ
પુરાણમ્  વિદ્યા ઉપનિષદઃ  શ્લોકાઃ  સૂત્રાણ્યનુવ્યાખ્યાનાનિ
વ્યાખ્યાનાન્યસ્યૈવૈતાનિ વિશ્વા ભૂતાનિ ॥ ૩૨॥

પઞ્ચેષ્ટકો વા એષોઽગ્નિઃ સંવત્સરઃ તસ્યેમા ઇષ્ટકા યો
વસન્તો ગ્રીષ્મો વર્ષાઃ શરદ્ધેમન્તઃ  સ
શિરઃપક્ષસીપૃચ્છપૃષ્ટવાન્
એષોઽગ્નિઃ પુરુષવિદઃ સેયં પ્રજાપતેઃ પ્રથમા ચિતિઃ
કરૈર્યજમાનમન્તરિક્ષમુત્ક્ષિઓપ્ત્વા વાયવે પ્રાયચ્છત્
પ્રાણો વૈ વાયુઃ  પ્રાણોઽગ્નિસ્તસ્યેમા ઇષ્ટકા યઃ પ્રાણો
વ્યાનોઽપાનઃ સમાન ઉદાનઃ  સ
શિરઃપક્ષસીપૃષ્ઠપુચ્છવાનેષોઽગ્નિઃ
પુરુષવિદસ્તદિદમન્તરિક્ષં પ્રજાપતેર્દ્વિતીયા ચિતિઃ  કરૈર્યજમાનં
દિવમુત્ક્ષિપ્તેન્દ્રાય પ્રાયચ્છત્  અસૌ વા આદિત્ય ઇન્દ્રઃ  સૈષોઽગ્નિઃ
તસ્યેમા ઇષ્ટકા યદૃગ્યજુઃ સામાથર્વાઙ્ગિરસા ઇતિહાસં પુરાણં
સ શિરઃપક્ષસીપુચ્છપૃષ્ઠવાનેષોઽગ્નિઃ પુરુષવિદઃ  સૈષા
દ્યૌઃ પ્રજાપતેસ્તૃતીયા ચિતિઃ  કરૈર્યજમાનસ્યાત્મવિદેઽવદાનં

કરોતિ  યથાત્મવિદુત્ક્ષિપ્ય બ્રહ્મણે પ્રાયચ્છત્
તત્રાનન્દી મોદી ભવતિ ॥ ૩૩॥

પૃથિવીગાર્હપત્યોઽન્તરિક્ષં દક્ષિણાગ્નિર્દ્યૌરાહવનીયઃ
તત એવ પવમાનપાવકશુચય આવિષ્કૃતમેતેનાસ્ય
યજ્ઞમ્   યતઃ પવમાનપાવકશુચિસંઘાતો હિ જાઠરઃ
તસ્માદગ્નિર્યષ્ટવ્યઃ ચેતવ્યઃ સ્તોતવ્યોઽભિધ્યાતવ્યઃ
યજમાનો હવિર્ગૃહીત્વા દેવતાભિધ્યાનમિચ્છતિ   :
હિરણ્યવર્ણઃ શકુનો હૃદ્યાદિત્યે પ્રતિષ્ઠિતઃ
મદ્ગુર્હંસસ્તેજોવૃષઃ સોઽસ્મિન્નગ્નૌ યજામહે
ઇતિ ચાપિ મન્ત્રાર્થં વિચિનોતિ । તત્સવિતુર્વરેણ્યં ભર્ગોઽસ્યાભિધ્યેયં
યો બુદ્ધ્યન્તસ્થો ધ્યાયીહ મનઃશાન્તિપદમનુસરત્યાત્મન્યેવ
ધત્તેઽત્રેમે શ્લોકા ભવન્તિ   :

૧  યથા નિરિન્ધનો વહ્નિઃ સ્વયોનાવુપશામ્યતે
તથા વૃત્તિક્ષયાચ્ચિત્તં સ્વયોનાવુપશામ્યતે ।
૨  સ્વયોનાવુપશાન્તસ્ય મનસઃ સત્યકામતઃ
ઇન્દ્રિયાર્થવિમૂઢસ્યાનૃતાઃ કર્મવશાનુગાઃ ।
૩  ચિત્તમેવ હિ સંસારમ્  તત્પ્રયત્નેન શોધયેત્
યચ્ચિત્તસ્તન્મયો ભવતિ ગુહ્યમેતત્સનાતનમ્ ।
૪  ચિત્તસ્ય હિ પ્રસાદેન હન્તિ કર્મ શુભાશુભમ્
પ્રસન્નાત્માત્મનિ સ્થિત્વા સુખમવ્યયમશ્નુતે ।
૫  સમાસક્તં યથા ચિત્તં જન્તોર્વિષયગોચરે
યદ્યેવં બ્રહ્મણિ સ્યાત્તત્કો ન મુચ્યેત બન્ધનાત્ ।
૬  મનો હિ દ્વિવિધં પ્રોક્તં શુદ્ધં ચાશુદ્ધમેવ ચ
અશુદ્ધં કામસમ્પર્કાત્ શુદ્ધં કામવિવર્જિતમ્ ।
૭  લય વિક્ષેપરહિતં મનઃ કૃત્વા સુનિશ્ચલમ્
યદા યાત્યમનીભાવં તદા તત્પરમં પદમ્ ।
૮  તાવન્મનો નિરોદ્ધવ્યં હૃદિ યાવત્ક્ષયં ગતમ્
એતજ્જ્ઞાનં ચ મોક્ષં ચ શેષાન્યે ગ્રન્થવિસ્તરાઃ ।
૯  સમાધિનિર્ધૌતમલસ્ય ચેતસો નિવેશિતસ્યાત્મનિ યત્સુખં ભવેત્
ન શક્યતે વર્ણયિતું ગિરા તદા સ્વયં તદન્તઃકરણેન ગૃહ્યતે ।
૧૦  અપામાપોઽગ્નિરગ્નૌ વા વ્યોમ્નિ વ્યોમ ન લક્ષયેત્

એવમન્તર્ગતં યસ્ય મનઃ સ પરિમુચ્યતે ।
૧૧ મન એવ મનુષ્યાણં કારણં બન્ધમોક્ષયોઃ
બન્ધાય વિષયાસંગિં મોક્ષો નિર્વિષયં સ્મૃતમ્ ।
અતોઽનગ્નિહોત્ર્યનગ્નિચિદજ્ઞાનભિધ્યાયિનાં બ્રાહ્મણઃ
પદવ્યોમાનુસ્મરણં વિરુદ્ધમ્ તસ્માદગ્નિર્યષ્ટવ્યઃ ચેતવ્યઃ
સ્તોતવ્યોઽભિધ્યાતવ્યઃ ॥ ૩૪॥

નમોઽગ્નયે પૃથિવી ક્ષિતે લોકસ્મૃતે લોકમ્સ્મૈ યજમાનાય ધેહિ
નમો વાયવેઽન્તરિક્ષક્ષિતે લોકસ્મૃતે લકમસ્મૈ યજમાનાય ધેહિ
નમ આદિત્યાય દિવિક્ષિતે લોકસ્મૃતે લોકમસ્મૈ યજમાનાય ધેહિ
નમો બ્રહ્મણે સર્વક્ષિતે સર્વસ્મૃતે સર્વમસ્મૈ યજમાનાય ધેહિ
હિરણ્મયેન પાત્રેણ સત્યસ્યાપિહિતં મુખમ્
તત્ત્વં પૂષન્નપાવૃણુ સત્યધર્માય વિષ્ણવે
યોઽસા આદિત્યે પુરુષઃ સોઽસા અહમ્ એષ હ વૈ સત્યધર્મો યદાદિત્યસ્ય
આદિત્યત્વં તચ્છુક્લમ્ પુરુષમ્ અલિઙ્ગમ્ નભસોઽન્તર્ગતસ્ય
તેજસોંઽશમાત્રમેતદ્યદાદિત્યસ્ય મધ્ય ઇવેત્ય્ અક્ષિણ્યગ્નૌ
ચૈતદ્બ્રહ્મૈતદમૃતમેતદ્ભર્ગઃ એતત્સત્યધર્મો નભસોઽન્તર્ગતસ્ય
તેજસોંઽશમાત્રમેતદ્યદાદિત્યસ્ય મધ્યે અમૃતં યસ્ય હિ સોમઃ પ્રાણા
વા અપ્યયંકુરા એતક઼્દ્બ્રહ્મૈતદમૃતમેતદ્ભર્ગઃ એતત્સત્યધર્મો
નભસોઽન્તર્ગતસ્ય તેજસોઽંશમાત્રમ્ એતદ્યદાદિત્યસ્ય મધ્યે
યજુર્દીપ્યત્યૌમાપોજ્યોતિરસોઽમૃતંબ્રહ્મ ભૂર્ભુવઃ સ્વરોમ્ ।
અષ્ટપાદં શુચિં હંસં ત્રિસૂત્રમણુમવ્યયમ્
દ્વિધર્મોઽન્ધં તેજસેન્ધં સર્વં પશ્યન્પશ્યતિ
નભસોઽન્તર્ગતસ્ય તેજસોઽન્શમાત્રમેતદ્યદાદિત્યસ્ય મધ્યે ઉદિત્વા
મયૂખે ભવત એતત્સવિત્સત્યધર્મ એતદ્યજુરેતત્તપ
એતદગ્નિરેતદ્વાયુરેતત્પ્રાણ
એતદાપ એતચ્ચન્દ્રમા
એતચ્છુક્રમેતદમૃતમેતદ્બ્રહ્મવિષયમેતદ્ભાનુરર્ણવસ્તસ્મિન્નેવ
યજમાનઃ સૈન્ધવ ઇવ વ્લીયન્ત એષા વૈ બ્રહ્મૈકતાત્ર હિ સર્વે કામાઃ
સમાહિતા
ઇત્યત્રોદાહરન્તિ :
અંશુધારય ઇવાણુવાતેરિતઃ સંસ્ફુરત્યસાવન્તર્ગઃ સુરાણામ્ યો

હૈવંવિત્સ સવિત્
સ દ્વૈતવિત્ સૈકધામેતઃ સ્યાત્તદાત્મકશ્ચ : યે વિન્દવ
ઇવાભ્યુચ્ચરન્ત્યજસ્રમ્
વિદ્યુદિવાભ્રાર્ચિષઃ પરમે વ્યોમન્ તેઽર્ચિષો વૈ યશસ
આશ્રયવાસાજ્જટાભિરૂપા
ઇવ કૃષ્ણવર્ત્મનઃ ॥ ૩૫॥

દ્વે વા વ ખલ્વેતે બ્રહ્મજ્યોતિષો રૂપકે શાન્તમેકં સમૃદ્ધં ચૈકમ્

અથ યચ્છન્તં તસ્યાધારં ખમ્ અથ યત્સમૃદ્ધમિદં તસ્યાન્નમ્
તસ્માન્મન્ત્રૌષધાજ્યામિષપુરોડાશસ્થાલીપાકાદિભિર્યષ્ટવ્યમન્ત-
ર્વેદ્યામાસ્ન્યવશિષ્ટૈરન્નપાનૈશ્ચાસ્યમાહવનીયમિતિ મત્વા તેજસઃ
સમૃદ્ધ્યૈ પુણ્યલોકવિજિત્યર્થાયામૃતત્વાય ચાત્રોદાહરન્તિ :
અગ્નિહોત્રં જુહુયાત્સ્વર્ગકામો યમરાજ્યમગ્નિષ્ટોમેનાભિયયતિ
સોમરાજ્યમુક્થેન સૂર્યરાજ્યં ષોડશીના સ્વારાજ્યમતિરાત્રેણ
પ્રાજાપત્યમાસહસ્રસંવત્સરાન્તક્રતુનેતિ :

વર્ત્યાધારસ્નેહયોગાદ્યથા દીપસ્ય સંસ્થિતિઃ ।
અન્તર્યાણ્ડોપયોગાદિમૌ સ્થિતાવાત્મશિચી તથા ॥

॥ ૩૬॥

તસ્માદોમિત્યનેનૈતદુપાસીતાપરિમિતં તેજસ્તત્રેધભિહિતમગ્નાવાદિત્યે
પ્રાણેઽથૈષા નાડ્યન્નબહુમિત્યેષાગ્નૌ હુતમાદિત્યં ગમયતિ અતો યો
રસોઽસ્રવત્ સ ઉદ્ગીથં વર્ષતિ તેનેમે પ્રાણાઃ પ્રાણેભ્યઃ પ્રજા
ઇત્યત્રોદાહરન્તિ :
યદ્ધવિરગ્નૌ હૂયતે તદાદિત્યં ગમયતિ તત્સૂર્યો રશ્મિભિર્વર્ષતિ
તેનાન્નં ભવતિ અન્નાદ્ભૂતાનામુત્પત્તિરિત્યેવં હ્યાહ :

અગ્નૌ પ્રાસ્તાહુતિઃ સમ્યગાદિત્યમુપતિષ્ઠતે ।
આદિત્યાજ્જાયતે વૃષ્ટિર્વૃષ્ટેરન્નં તતઃ પ્રજાઃ ॥

॥ ૩૭॥

અગ્નિહોત્રં જુહ્વાનો લોભજાલં ભિનત્તિ અતઃ સંમોહં છિત્વા ન
ક્રોધાન્સ્તુન્વાનઃ કામમભિધ્યાયમાનસ્તતશ્ચતુર્જાલં
બ્રહ્મકોશં ભિન્દદતઃ પરમાકાશમત્ર હિ સૌર
સૌમ્યાગ્નેયસાત્વિકાનિ મણ્ડલાનિ ભિત્ત્વા તતઃ શુદ્ધઃ

સત્ત્વાન્તરસ્થમચલમમૃતમચ્યુતં ધ્રુવં વિષ્ણુસંજ્ઞિતમ્
સર્વાપરં ધામ સત્યકામસર્વજ્ઞત્વસંયુક્તમ્ સ્વતન્ત્રમ્
ચૈતન્યમ્ સ્વે મહિમ્નિ તિષ્ઠમાનં પશ્યતિ અત્રોદાહરન્તિ :

રવિમધ્યે સ્થિતઃ સોમઃ સોમમધ્યે હુતાશનઃ ।
તેજોમધ્યે સ્થિતં સત્ત્વં સત્ત્વમધ્યે સ્થિતોઽચ્યુતઃ ॥

શરીરપ્રાદેશાઙ્ગુષ્ઠમાત્રમણોરપ્યન્વયં ધ્યાત્વાતઃપરમતાં
ગચ્છતિ અત્ર હિ સર્વે કામાઃ સમાહિતા ઇતિ અત્રોદાહરન્તિ :
અઙ્ગુષ્ઠપ્રાદેશશરીરમાત્રં પ્રદીપપ્રતાપવદ્દ્વિસ્ત્રિધા હિ
તદ્બ્રહ્માભિષ્ટૂયમાનં મહો દેવો ભુવનાન્યાવિવેશ ।
ૐ નમો બ્રહ્મણે નમઃ ॥ ॥ ૩૮॥

ઇતિ ષષ્ઠઃ પ્રપાઠકઃ ॥

---

પ્રપાઠક ૭ ।
અગ્નિર્ગાયત્રં ત્રિવૃદ્રથન્તરં વસન્તઃ પ્રાણો નક્ષત્રાણિ
વસવઃ પુરસ્તાદુદ્યન્તિ તપન્તિ વર્ષન્તિ સ્તુવન્તિ પુનર્વિશ્નતિ
અન્તર્વિવએણેક્ષન્તિ અચિન્ત્યોઽમૂર્તો ગભીરો
ગુણભુગ્ભયોઽનિર્વૃત્તિર્યોગીશ્વરઃ
સર્વજ્ઞો મઘોઽપ્રમેયોઽનાદ્યન્તઃ શ્રીમાન્ અજો ધીમાનનિર્દેશ્યઃ
સર્વસૃક્ સર્વસ્યાત્મા સર્વભુક્ સર્વસ્યેશાનઃ
સર્વસ્યાન્તરાન્તરઃ ॥ ૧॥

ઇન્દ્રસ્ત્રિષ્ટુપ્ પઞ્ચદશો બૃહદ્ગ્રીષ્મો વ્યાનઃ સોમો રુદ્રા દક્ષિણત
ઉદ્યન્તિ તપન્તિ વર્ષન્તિ સ્તુવન્તિ પુનર્વિશન્તિ અન્તર્વિવરેણ
ઈક્ષન્તિ : અનાદ્યન્તોઽપરિમિતોઽપરિચ્છિન્નોઽપરપ્રયોજ્યઃ
સ્વતન્ત્રોઽલિઙ્ગોઽમૂર્તોઽનન્તશક્તિર્ધાતા ભાસ્કરઃ ॥ ૨॥

મરુતો જગતી સપ્તદશો વૈરૂપમ્ વર્ષા અપાનઃ શુક્ર
આદિત્યાઃ પશ્ચાદુદ્યન્તિ તપન્તિ વર્ષન્તિ સ્તુવન્તિ પુનર્વિશન્તિ
અન્તર્વિવરેણેક્ષન્તિ તચ્છાન્તમશબ્દમભયમશોકમાનન્દમ્ તૃપ્તમ્

સ્થિરમચલમમૃતમચ્યુતમ્ ધ્રુવમ્ વિષ્ણુસંજ્ઞિતમ્ સર્વાપરં
ધામ ॥ ૩॥

વિશ્વે દેવા અનુષ્ટુબેકવિંશો વૈરાજઃ શરત્સમાનો વરુણઃ સાધ્યા

ઉત્તરત ઉદ્યન્તિ તપન્તિ વર્ષન્તિ સ્તુવન્તિ પુનર્વિશન્તિ
અન્તર્વિવરેણેક્ષન્તિ અન્તઃશુદ્ધઃ પૂતઃ શૂન્યઃ શાન્તોઽપ્રાણો
નિરાત્માનન્તઃ ॥ ૪॥

મિત્રાવરુણૌ પઙ્ક્તિસ્ત્રિણવત્રયસ્ત્રિંશો શાક્વરરૈવતે હેમન્ત
શિશિરા ઉદાનોઽઙ્ગિરસશ્ચન્દ્રમા ઊર્ધ્વા ઉદ્યન્તિ તપન્તિ
વર્ષન્તિ સ્તુવન્તિ પુનર્વિશન્તિ અન્તર્વિવરેણેક્ષન્તિ પ્રણવાખ્યં
પ્રણેતારમ્
ભારૂપમ્ વિગતનિદ્રમ્ વિજરમ્ વિમૃત્યુમ્ વિશોકમ્ ॥ ૫॥

શનિરાહુકેતુરગરક્ષોયક્ષનરવિહગશરભેભાદયોઽધસ્તાદુદ્યન્તિ
તપન્તિ વર્ષન્તિ સ્તુવન્તિ પુનર્વિશન્તિ અન્તર્વિવરેણેક્ષન્તિ
યઃ પ્રાજ્ઞો વિધરણઃ સર્વાન્તરોઽક્ષરઃ શુદ્ધઃ પૂતઃ ભાન્તઃ
ક્ષાન્તઃ શાન્તઃ ॥ ૬॥

એષ હિ ખલ્વાત્મન્તર્હૃદયેઽણીયાનિદ્ધોઽગ્નિરિવ
વિશ્વરૂપોઽસ્યૈવાન્નમિદં
સર્વમસ્મિન્નોતા ઇમાઃ પ્રજાઃ એષ આત્માપહતપાપ્મા વિજરો
વિમૃત્યુર્વિશોકોઽવિચિકિત્સોઽવિપાશઃ સત્યસઙ્કલ્પઃ સત્યકામઃ
એષ પરમેશ્વરઃ એષ ભૂતાધિપતિઃ એષ ભૂતપાલઃ એષ સેતુઃ
વિધરણઃ
એષ હિ ખલ્વાત્મેશાનઃ શમ્ભુર્ભવઓરુદ્રઃ પ્રજાપતિર્
વિશ્વસૃખ્હિરણ્યગર્ભઃ
સત્યં પ્રાણો હંસઃ શસ્તાચ્યુતો વિષ્ણુર્નારાયણઃ યશ્ચૈષોઽગ્નૌ
યશ્ચાયં
હૃદયેવયશ્ચાસાવાદિત્યે સ એષ એકઃ તસ્મૈ તે વિશ્વરૂપાય સત્યે
નભસિ હિતાય નમઃ ॥ ૭॥

અથેદાનીં જ્ઞાનોપસર્ગા રાજન્મોહજાલસ્યૈષ વૈ યોનિઃ યદસ્વર્ગૈઃ
સહ સ્વર્ગસ્યૈષ વાટ્યે પુરસ્તાદુક્તેઽપ્યધઃ સ્તમ્બેનાશ્લિષ્યન્તિ
અથ યે ચાન્યે હ નિત્યપ્રમુદિતા નિત્યપ્રવસિતા નિત્યયાચનકા
નિત્યં શિલ્પોપજીવિનોઽથ યે ચાન્યે હ પુરયાચકા અયાજ્યયાચકાઃ
શુદ્રશિષ્યાઃ શૂદ્રશ્ચ શાસ્ત્રવિદ્વાંસોઽથ યે ચાન્યે હ
ચાટજટનટભટપ્રવ્રજિતરઙ્ગાવતારિણો રાજકર્મણિ પતિતાદયોઽથયે

ચાન્યે હ યક્ષરાક્ષસભૂતગણપિશાચોરગગ્રહાદીનામર્થં
પુરસ્કૃત્ય શમયામ ઇત્યેવં બ્રુવાણા  અથ યે ચાન્યે હ વૃથા
કષાયકુણ્ડલિનઃ કાપાલિનોઽથ યે ચાન્યે હ વૃથા
તર્કદૃષ્ટાન્તકુહકેન્દ્રજાલૈર્વૈદિકેષુ પરિસ્થાતુમિચ્છન્તિ  તૈઃ સહ
ન સંવસ્ત્  પ્રકાશ્યભૂતા વૈ તે તસ્કરા અસ્વર્ગ્યા ઇત્યેવં હ્યાહ   :

નૈરાત્મ્યવાદકુહકૈર્મિથ્યાદૃષ્ટાન્તહેતુભિઃ ।
ભ્રામ્યન્લોકો ન જાનાતિ વેદવિદ્યાન્તરન્તુ યત્ ॥

॥ ૮॥

બૃહસ્પતિર્વૈ શુક્રો ભૂત્વેન્દ્રસ્યાભયાયાસુરેભ્યઃ
ક્ષયાયેમામવિદ્યામસૃજત્
તયા શિવમશિવમિત્યુદ્દિશન્ત્યશિવં શિવમિતિ
વેદાદિશાસ્ત્રહિંસકધર્માભિધ્યાનમસ્ત્વિતિ
વદન્તિ  અતો નૈનામભિધીયેતાન્યથૈષા બન્ધ્યેવૈષા રતિમાત્રં
ફલમસ્યા વૃત્તચ્યુતસ્યેવ નારમ્ભણીયેત્યેવં હ્યાહ   :

દૂરમેતે વિપરીતે વિષૂચી  અવિદ્યા યા ચ વિદ્યેતિ જ્ઞાતા ।
વિદ્યાભીપ્સિતું નચિકેતસં મન્યે  ન ત્વા કામા બહવો લોલુપન્તે ॥

વિદ્યાં ચાવિદ્યાં ચ યસ્તદ્વેદોભયં સહ ।
અવિદ્યયા મૃત્યું તીર્ત્વા વિદ્યયા અમૃતમશ્નુતે ॥

અવિદ્યાયામન્તરે વેષ્ટ્યમાનાઃ  સ્વયં ધીરાઃ પણ્ડિતં મન્યમાનાઃ ।
દન્દ્રમ્યમાનાઃ પરિયન્તિ મૂઢા અન્ધેનૈવ
નીયમાના યથાન્ધાઃ ॥                    ॥ ૯॥

દેવાસુરા હ વૈ ય આત્મકામા બ્રહ્મણોઽન્તિકં પ્રયાતાઃ  તસ્મૈ
નમસ્કૃત્વોચુઃ  ભગવન્  વયમાત્મકામાઃ સ ત્વં નો બ્રૂહીતિ
અતશ્ચિરં ધ્યાત્વાઽમન્યતાન્યતામાનો વૈ તેઽસુરા
અતોઽન્યતમમેતેષામુક્તમ્
તદિમે મૂઢા
ઉપજીવન્ત્યભિષ્વઙ્ગિણસ્તર્યાભિઘાતિનોઽનૃતાભિશંસિનઃ
સત્યમિવાનૃતં પશ્યન્તીન્દ્રજાલવદિત્યતો યદ્વેદેષ્વાભિહિતં તત્સત્યં
યદ્વેદેષૂક્તં તદ્વિદ્વાંસ ઉપજીવન્તિ  તસ્માદ્બ્રાહ્મણો
નાવૈદિકમધીયીતાયમર્થઃ

સ્યાદિતિ ॥ ૧૦॥

એતદ્વા વ તત્સ્વરૂપં નભસઃ ખેઽન્તર્ભૂતસ્ય યત્પરં
તેજસ્તત્ત્રેધાભિહિતમગ્ના આદિત્યે પ્રાણ એતદ્વા વ તત્સ્વરૂપં
નભસઃ ખેઽન્તર્ભૂતસ્ય યદોમિત્યેતદક્ષરમનેનૈવ તદુદ્બુધ્યતિ
ઉદયતિ  ઉચ્છ્વસતિ  અજસ્રં બ્રહ્મધીયાલમ્બં વાત્રૈવૈતત્સમીરણે
નભસિ પ્રસાખયૈવોત્ક્રમ્ય સ્કધાત્સ્કન્ધમનુસર્ત્યપ્સુ પ્રક્ષેપકો
લવણસ્યેવ ઘૃતસ્ય
ચૌષ્ણ્યમિવાભિધ્યાતુર્વિસ્તૃતિરિવૈતદિત્યાત્રોદાહરન્તિ   :
અથ કસ્માદુચ્યતે વૈદ્યુતો યસ્માદુચ્ચારિતમાત્ર એવ સર્વં શરીરં
વિદ્યોતયતિ  તસ્માદોમિત્યનેનૈતદુપાસીતાપરિમિતં તેજઃ ।

૧  પુરુષશ્ચક્ષુષો યોઽયં દક્ષિણોઽક્ષિણ્યવસ્થિતઃ ।
ઇન્દ્રોઽયમસ્ય જાયેયં સવ્યે ચાક્ષિણ્યવસ્થિતા ॥

૨  સમાગમસ્તયોરેવ હૃદયાન્તર્ગતે સુષૌ ।
તેજસ્તલ્લોહિતસ્યાત્ર પિણ્ડ એવોભયોસ્તયોઃ ॥

૩  હૃદયાદાયાતિ તાવચ્ચક્ષુષ્યસ્મિન્પ્રતિષ્ઠિતા ।
સારણી સા તયોર્નાડી દ્વયોરેકા દ્વિધા સતી ॥

૪  મનઃ કાયાગ્નિમાહન્તિ સ પ્રેરયતિ મારુતમ્ ।
મારુતસ્તૂરસિ ચરન્મન્દ્રં જનયતિ સ્વરમ્ ॥

૫  ખજાગ્નિયોગાદ્ હૃદિ સમ્પ્રયુક્તમણોર્હ્યણુર્દ્વિરણુઃ કણ્ઠદેશે ।
જિહ્વાગ્રદેશે ત્ર્યણુકં ચ વિદ્ધિ વિનિર્ગતં માતૃકમેવમાહુઃ ॥

૬  ન પશ્યન્મૃત્યુમ્ પશ્યતિ ન રોગં નોત દુઃખતામ્ ।
સર્વં હિ પશ્યન્પશ્યતિ સર્વમાપ્નોતિ સર્વશઃ ॥

૭  ચાક્ષુષઃ સ્વપ્નચારી ચ સુપ્તઃ સુપ્તાત્પરશ્ચ યઃ ।
ભેદાશ્ચૈતેઽસ્ય ચત્વારસ્તેભ્યસ્તુર્યં મહત્તરમ્ ॥

૮  ત્રિષ્વેકપાચ્ચરેદ્બ્રહ્મ ત્રિપાચ્ચરતિ ચોત્તરે ।
સત્યાનૃતોપભોગાર્થઃ દ્વૈતીભાવો મહાત્મન ઇતિ
દ્વૈતીભાવો મહાત્મન ઇતિ ॥          ॥ ૧૧॥

ઇતિ સપ્તમઃ પ્રપાઠકઃ ॥

ૐ આપ્યાયન્ત્વિતિ શાન્તિઃ ॥

ઇતિ મૈત્રાયણ્યુપનિષત્સમાપ્ત ॥

Encoded by Sunder Hattangadi
The prapAThaka 6 and 7 are available in
Dr. Radhakrishnan's book. Se other references in Indexextra.

*Maitri (Maitrayani) Upanishad*
pdf was typeset on August 13, 2021

Please send corrections to *sanskrit@cheerful.com*